PRATĀPARUDRA-VIJAYA

OR

VIDYĀNĀTHA-VIḌAMBANA

A Parody in four Acts

By

Kavi Kokila Dr. V. RAGHAVAN

Professor of Sanskrit, University of Madras (Retd.)

Jawaharlal Nehru Fellow

with Foreword in English by

Prof. K. A. SUBRAMANIA AIYAR

Formerly Vice-Chancellor, University of Lucknow

&

Appreciation in Samskrit by

Pandit CHARUDEVA SASTRI, New Delhi

PUNARVASU

m Street, Royapettah, Madras-14



विद्यानाथविडम्बनापरनामा

प्रतापरुद्रविजयः

श्रीचारुदेवशास्त्रिणः ...
सस्नेहम् सौजन्य...
वे. राघवः

कविकोकिल-

डा. वे. राघवेण निर्मितः

के. ए. सुब्रह्मण्यार्याणां प्रस्तावनोक्त्या
पण्डितचारुदेवशास्त्रिणामभिनन्दनोक्त्या च
सहितः

पुनर्वसुः
७, श्रीकृष्णपुरवीथी, रायपेट्टा, मद्रास् १४
रू. ३

FOREWORD

The *Prataparudrayasobhusana* or briefly the *Prataparudriya* of Vidyanatha is a work on the Alankarasastra, belonging to the early part of the fourteenth century A.D. The peculiarity of this work is that the author illustrates every concept and technical point in poetics and dramaturgy by means of a stanza composed by himself, glorifying his patron King Prataparudra, of the Kakatiya dynasty of Warangal, called Ekasila in Sanskrit, in Andhra. Though the work has the merit of being a complete and comprehensive treatise dealing with the whole field of both poetics and dramaturgy, the student and the teacher soon tire of it because of the extreme monotony of the illustrations which sing the praise, in a conventional and exaggerated manner, of the same individual, the author's patron Prataparudra, the local King. Included in the Prataparudriya and given as a point by point illustration of the rules relating to a drama is a play in five acts called *Prataparudra Kalyana*, the marriage of Prataparudra. It depicts the Victory Expedition (*digvijaya*) which the young prince takes out to conquer the world. He marches forth in the four directions and the countries mentioned as having been conquered by him are Kalinga, Pandya, Anga, Vanga, Malava, Cola, Kasmira, Nepala, Suhma, Kamboja, Sevana, Gauda, Lata, Simhaḷa, Karnata, Bhoja, Kerala, Pancala and Kikata! On his return after this world conquest, he is crowned as the King, his marriage (*kalyana*) with Earth, Vasumati, being thus celebrated.

It is but natural that such a grossly exaggerated piece of eulogy, unrelated to reality, should provoke a parody and it was Dr. Raghavan who was inspired to write it. His work in four acts the *Prataparudravijaya* is otherwise called *Vidyanathavidambana*, Parody of Vidyanatha. It is an unqualified success. It is an extension of the exaggerations, hyperboles and conceits indulged in by Vaidyanatha in his illustrative verses and the panegyrical drama. The story is a continuation in the same trend as seen in the original of Vidyanatha. Prataparudra starts out on a Victory Expedition. The play begins with a dialogue between two citizens of the Kakatiya Capital Ekasila. The clouds of Dust raised by the marching forces soar up to the heavens obscuring the Sun and its lustre. The very earth seems to be rising up to

the heavens. The Sun being thus obscured, Darkness sets in too early, upsetting the daily routine of everybody. Brahmans, who have just had their midday meal, hasten to perform their evening Sandhya. Women start doing their evening toilette before time, birds flying back to their nests too early and bats and owls moving, and the temple priest, anxious to partake of the offerings, welcomes the untimely Darkness and is hurrying up the evening worship of the deity. The Dust has reached heaven and Indra and Saci talk about it. The waters of the celestial Ganga are rendered muddy with the Dust raised by the marching army. In heaven also, the evening has come too early. Madana is not able to collect the evening flowers, his weapons. Indra enters the Nandana wood with Saci. Dust gets into the eyes of the latter and into the thousand eyes of the former. Blinded by Dust, Saci falls into a swimming pool.

With such hyperboles and conceits, entirely in the manner of Vidyanatha, the play goes on to the second act which opens in a forest belonging to an enemy king who has been driven out of his Kingdom by Prataparudra and where the deposed kings have taken refuge depriving even Yogins of their usual diet of wild fruits and roots. A sylvan deity enters and describes the distress of the cattle and the deer. A friend of the sylvan deity gives the information that all this change is due to the prowess of Prataparudra. They are joined by the deity of Nandana. She deplores the effects in heaven of Prataparudra's Victory Expedition, the particular distress of Indra and the efforts of the Asvins, Moon and others to relieve it and their futility. Suddenly hot winds blow which is explained as due to the hot sighs of the deposed enemy kings and their wives. Indra in distress, attended upon by the Asvins and others, is introduced. A spy comes and informs that when heaven was thus enveloped with Dust and Darkness, the demons emerged and carried away Saci as ransom. Then enters Darkness itself and the whole of Amaravati is plunged in it. Indra consults Brhaspati who admits his helplessness. Suddenly, the King of the demons enters, leading his demon army against the heaven and the gods.

In the third act, while Matali, Indra's charioteer, is thinking of fetching God Siva in order to save heaven and the gods, Narada, returning from a visit to God Siva, conveys the latter's message that Prataparudra, his great devotee, should be brought from earth in order to save the situation in heaven. That king can be

found, at that time, in that mountainous region which is warm with his valour (*pratapa*) and cool with his glory (*kirti*), where both the *padma* and the *kuvalaya* bloom at the same time and where both the *Sun-stone* and the *Moon-stone* are to be seen, the former blazing and the latter melting! Enter two gods hiding somewhere in the despoiled Nandana wood. They are joined by a third who describes the condition of Amaravati after its invasion by the demons. Suddenly a brilliant Light appears. It is somebody coming up to heaven from the earth in Indra's chariot driven by Matali. Narada informs that it is none other than Prataparudra who will now destroy the demons and restore Amaravati to its former glory. When they arrive, Prataparudra first greets Narada and goes on to where the forces of the demons are. When, with his tremendous Lustre, he approaches Amaravati, all the demons are automatically destroyed. Prataparudra is, indeed, God Rudra himself!

In the last act, Matali, while rejoicing at the destruction of the demons, deplores that some of the eyes of Indra have lost their vision due to gazing at the dazzling Lustre (*pratapa*) of Prataparudra. No cure has been found. The Asvins are helpless. Even the cool soothing light of the Moon is not sufficient. Something more powerful is needed. Suddenly there appears an unheard of Whiteness, like that of a special moonlight. Now enters an alarmed Siddha and he announces that the Flood of Dissolution is spreading everywhere, engulfing everything. Others, equally alarmed, rush in and confirm the news. It is the cool Whiteness of the Glory (*kirti*) of Partaparudra which is spreading everywhere, resembling floods of the milk ocean. Entering the interior of everyone of the thousand, it cures the ailment in the eyes of Indra. Now come Siva and Parvati with Narada. They are going to Amaravati. Every one follows them. They arrive where Indra and Prataparudra are together. Indra rejoices over the restoration of the glory of Amaravati but cannot understand how the Dust, the Darkness and, finally, the unique Whiteness like that of an extraordinary moonlight came into being. Indra and Prataparudra greet God Siva and the others (Brahma, Visnu, Narada). Siva addresses the assembly of the gods and informs them that all that has happened is due to the prowess of Prataparudra. A celestial voice announces that Prataparudra will enjoy the lordship of heaven together with Indra. An apparently alarming Redness now spreads everywhere but it is nothing else than the Love (*anuraga*) for Prataparudra of the celestial nymphs,

captivated by his glory (*kirti*). Siva now announces the coronation of Prataparudra and asks him to share Indra's throne. From His own head He pours Ganga water on Prataparudra's head. Musical instruments are played and flowers showered on his head. The celestial nymphs dance. Siva calls upon Brahma to pronounce the benediction ; but words do not come out of Brahma's mouth ; Sarasvati is not there, she has gone elsewhere! So Siva thinks of the poet Vidyanatha, to whom She has gone, and he appears at once. Siva extols him. Vidyanatha comes forward and pronounces the benediction in a loud voice.

The above brief summary of the four acts gives an idea of the conceits and hyperboles, in Vidyanatha's own style, with which the author works out his parody. They show the author Dr. Raghavan's deep and complete saturation with Vidyanatha's work and with the conventions that hold sway over later Sanskrit Kavya literature. Out-Heroding Herod, he says, in one of his verses here : While Siva burnt Kama with his third eye and Tripura with his smile, the mere approach of Prataparudra was enough to reduce all demons to ashes.

अस्मिन् पुनरुपगच्छति भस्मीभवति दानवव्रातः । (p. 24)

As the play proceeds, Dr. Raghavan displays all the familiar devices of the Sanskrit poet. Where necessary, he knows how to match sound with sense. *E.g.* see the Anustubh verse on the rising masses of Dust, thrown up by the marching army of Prataparudra, which create the illusion of being massive clouds कल्पझञ्झोच्चलत् etc. Quite well constructed and made up of lively words is that stanza (p. 6) consisting of questions and answers (*prasnottara*) between Indra and Saci, surprised and shocked by the sudden changes wrought in heaven by the clouds of Dust raised by Prataparudra's army.

Resemblance between a woman and a creeper, so frequent a motif in Sanskrit literature, from the *Valmiki Ramayana* downwards, has been artistically utilised in a stanza (p. 6) where Indra invites Saci to sit with him under a mango tree round which winds a creeper which, with its flowers in bloom, bumble-bees buzzing around, leaves shaking in the wind and laden with fruit resembles his beloved with her radiant face, black eyes, long tresses quivering in the breeze and full bosom. The author is as at home in short idiomatic sentences as in long com-

pounds with their dignified and majestic gait in recitation. The first two long lines of II. 11 make up just one long *samasa*. In contrast to this is the first stanza uttered by the celestial voice (p. 28) because it is made up of short self-sufficient phrases in which there is a harmonious combination of nouns and verbs. To misunderstand the speaker's meaning by hearing the first word only and by not having, in one's agitation, the patience to listen to the whole sentence and consequently throwing oneself into a flurry is a device often used by Sanskrit poets. Indra's state of mind after the loss of Saci and the absence of any news about her gives the author an opportunity to use this method with great effectiveness in describing the interview between Indra and a spy in the presence of Brhaspati (p. 13). When the occasion arises, Dr. Raghavan can so fashion a stanza that can not only suit the context but can also serve the purpose of *subhasita*, that can be used at all times. An example of it is 1. 4 :

पुरुषविशेषज्ञानात् पामरसमजेन कीर्त्यते श्लाघा ।
रसिकसमाजस्य परं श्लाघाया उज्ज्वलो गुणो हेतुः ॥

All this has been possible because the author has combined, with a great deal of imagination, the motifs and conventions in which the vast Sanskrit literature abounds. His mastery over the technical side of a *kavya* is obvious at every step. While he observes, on the whole, the rules laid down by Bharata and his succesors in regard to drama, he does not do so slavishly. The play is not sought to be brought under any of the recognised kinds of drama and is designated simply as a *rupaka*, a dramatic representation.

Another technical aspect of a *kavya* is the metre in which the stanzas are composed. Here Dr. Raghavan displays not merely variety but also a fine sense of appropriateness. Awe-inspiring subjects are described in long metres having a stately and dignified march in recitation while objects of a more homely nature are depicted in shorter metres, producing thereby a relaxation. They are altogether forty-seven stanzas in the comparatively short play. The metres used range from the simple *Anustubh* and *Arya*, through *Indravajra*, *Harini*, *Vasantatilaka*, *Praharsini*, *Sikharini*, *Viyogini*, *Salini*, *Bhujangaprayata*, *Mandakranta* and *Sardulavikridita* right up to *Sragdhara* with its twenty-one syllables to a foot. The rhythm of everyone of these metres is well preserved, and they read very well indeed.

All this is very creditable indeed, especially when we remember that, though published only now, the play was written long ago when the author was still a youth who had just graduated from the University. Dr. Raghavan has had a very successful career of research as his many publications testify. But behind the *vidvan*, there was always the *kavi* waiting to be fully revealed. The author seems to have been conscious of it too, though he preferred to develop at first the other side of his talents. On reading the present play, after having read earlier some of his other creative writings as distinct from his critical work, one feels that he may have really received the special blessings of Sarasvati, as expressed by himself in the following words in the prologue of the present play :

—वत्सक ! वचस्ते पूर्णमासीसुधा-
भानूत्तालितफेनिलाब्धिलहरीकोलाहलं जृम्भताम् ।

All well-wishers of Dr. Raghavan will ardently wish that he will, in the future, devote his time and attention to the equal display of both sides of his literary talents.

LUCKNOW
10-5-1969

K. A. SUBRAMANIA IYER

अभिनन्दनोक्तिः

प्रथितनामधेयस्य डा० श्री वे० राघवार्यस्य प्रसिध्यन्त्युत्तरोत्तरप्रकर्षवत्यः कृतयो भूरयः । नचिरप्रणीतमिदं प्रतापरुद्रीयं नाम रूपकं प्रणीतचरेषु रूपकेषु नृपायते नाम । कविकल्पनोत्थमस्य कथावस्तु निःसामान्यं किमपि कामनीयकं धत्ते । रूपकमिदं वीररुद्रस्यान्ध्राधिपस्य दिग्विजययात्रां प्रस्तवीति साम्राज्याभिषेकेण च समं पर्यवस्यति । शक्यं नाम रूपकप्रतिपाद्योऽर्थ इत्थं समस्य विन्यसितुम्—अस्त्यन्ध्रेष्वेकशिलायां नगर्यां रुद्रभक्तिर्दिगन्तविश्रान्तकीर्तिराभिगामिकगुणग्रामाभिरामः श्रीवीररुद्रो नाम क्षितीशः क्षितिं शास्ति । दिग्विजयप्रसङ्गेन प्रसरताऽस्य चतुरङ्गबलेनोद्धतं रजःपटलं भुवं सञ्छाद्य दिवमाक्रामति । रजोनिकरविलुप्तदर्शना महेन्द्रमहिषी शची कापि विनश्यति, एकला च सती दैत्यैर्लब्धावसरैरपवाह्यते । उद्धुरैस्तैर्दैवतस्तोमो विद्राव्यते, अमरावती च रुध्यते, सुधर्मा चाप्यध्यास्यत इत्यनर्थपरम्परया चरेण विज्ञापितया परं दूयते पुरन्दरः । दूनश्चेन्द्राणीं गवेषयन्नितस्तत आहिण्डते । इत्थं विधिवशाद्विपरिणतायां दशायां महेन्द्रसारथिर्मातलिर्हिमाद्रिमधिवसन्तं महाश्वेतं रुद्रमभ्युपपत्तिं याचितुमुच्चलति । क्षणादेव त्रिलोकीपान्थो देवर्षिर्नारदः समुपतिष्ठते । मातलिचिन्तितं भगवद्भूतेशोपगमनं निषेधति, प्रणिगदति च भगवदादेशम्—'नारद ! याहि, मातलिं मर्त्यलोकं प्रेरय, मद्भक्तं महीनाथं वीररुद्रं चाकारय, तेन च विपदमेतां वारय, गत्यन्तरं नास्ति' इति । कोऽयं वीररुद्र इत्यनुयुक्तो नारदः प्रत्याह—अस्ति भूलोकशेखरायमाणान्ध्रेष्वेकशिला नाम नगरी, तस्यां राजते सम्प्रति प्रक्रान्तदिग्विजययात्रः काकतीयकुलदुग्धाब्धिकौस्तुभः सांयुगीनो महावीरो वीररुद्रः शिवभागवतः प्रजेशः । महाभागोऽसौ क्वोपद्रष्टव्य इति भूयः पर्यनुयुक्तो भगवान्नारदस्तेन तेन विशेषेण तं हिमाचलप्रदेशं विशिनष्टि यत्र संनिवेशितशिबिर आस्ते स महाभागः । इति सम्प्राप्तसङ्केतो मातलिर्नारदोदीरिताभिराशीर्भिः समं रथमास्थाय हिमाचलं प्रयाति । देवर्षिश्चापि दुःस्थानमरानाश्वासयितुं देवलोकं गन्तुमुपक्रमते । अत्रान्तरेऽतिकदर्थितं शुचा परीतं देवकुलं न क्षणमपि क्षणं लभते । देवेश इन्द्रोऽपि रुजाक्रान्त एवावस्कद्य कारायां क्षिप्तो दानवैर्ऋतिङ्करैः । देवाङ्गनाश्च तारता बलादपहृत्य स्वीकृताः । सुधर्मा चापि सांराविणं वितन्वद्भिः परं

पर्याकुलीकृतेति भयेन विह्वलन्तः केचिद् एकद्वा द्वित्रा वा देवा मिथो दशाविपरिवर्तं वर्णयन्ति । इत्थं शोचतस्तान् सान्त्वं प्रबोधयति भगवान्नारदः—एष आयाति भवतामुज्जीवयिता तेजसां राशिर्वीररुद्रो महीपः । तद्धैर्यं धत्त, मा भैष्ट । अयं ह्यपरो रुद्र इवेति विज्ञाय विस्रब्धा भवतेति । मातलिसहचरितो वीररुद्रो देवलोके सन्निधीयमानस्तत्र रथादवतरति यत्र भगवान्नारदः स्थितः । मातलिना परिचायितो नारदं विनीतवन्नमति । संगिरते च सुरारिबलनिवर्हणम् । ततः सुधर्मायां तद्बलं वर्तत इति केभ्यश्चित्सुरेभ्योऽवगत्य तन्निर्मथनाय निर्याति । आहूतास्ते सुधर्माया यावन्निष्क्रामन्ति तावत्तस्य प्रतापतेजोमयूखै-र्निष्टप्ता भस्मावशेषा भवन्ति । ततो देवेन्द्रो दितिजकारातो मुक्तः सिंहासनं प्रत्यापद्यते प्रियामिन्द्राणीं च । वीररुद्रस्य तेजसोपहतानि कानिचिदस्य चक्षूंषि नाद्यापि निर्गतगदानि भवन्ति, तीव्रां च वेदनां तन्वन्ति ॥

एवमवस्थिते भगवांश्चन्द्रमौलिर्महाश्वेतः परमेश्वरः स्वयं देवलोकमुपैति स्वस्य भक्तस्य वीररुद्रस्य परमेश्वरप्रतिष्ठाभिषेकं निर्वर्तयिष्यामीति । भगवत आदेशेन वीररुद्रेण साकमेकासनमलङ्करोति महेन्द्रः । ततो भगवान् भूतेशः स्वशिरःपूतत्रिमार्गगासलिलानि वीररुद्रस्योपर्यासिञ्चति । पुण्येऽस्मिन् महामहे वदन्ति मङ्गल्यानि वाद्यानि, पतन्ति पुष्पवृष्टयः, नृत्यन्ति भावनिर्भरं स्ववार-विलासिन्यः, नन्दन्ति च समे समं कण्टकितकलेबरा निर्जराः ॥

नाटकीयेऽस्मिन् वस्तुनि नैकतमदप्यङ्गं विश्लथं विसंहितं वा समस्ति । पूर्वपूर्वानुबन्धि सर्वमुत्तरं वृत्तजातम् । सर्वः सांसिद्धिको विकासक्रम आनिर्वहणात् । कारुणिकस्य भगवतो भवस्य द्युलोकगमनं वीररुद्रस्य स्वेन साम्राज्याभिषेकश्च स्वस्य भक्तस्य कृते किं किं न समाचरन्तीश्वरा इति सर्वं सङ्गतं भवति । चतुरङ्केऽस्मिन् रूपके वहु नाम वर्ण्यमुपनिवद्धमिति कवेरनल्पां कल्पनाशक्तिं व्यक्तिं नयति ॥

रसस्य शरीरिणः प्रकर्षका गुणा इति ते तावन्निदर्श्यन्ते । शचीदेवराजयो रहःसङ्गतयोर्माधुर्यभरभरिता हृदयग्रहणीयैः पदैर्ग्रथिता या संभाषा प्रश्नोत्तरैः प्रवृत्ता सा प्रसादस्य कापि रुचिरा निदर्शना भवति ।

किं ते पौलोमि! दुःखं प्रिय! किमिति परं म्लायते कल्पवृक्षै-
र्मा भूदस्माद्विषादः कुवलयसरसीमेहि संभावयावः ।

किं वा तत्राह्नि मुग्धे ! विकसितसुषमैवाद्य सा चित्रमेतन्
चित्रं किं त्यागिवीरक्षितिपतियशसा प्लाव्यते सर्वलोकः ॥ १.१५ ॥ इति।

इदं चापरमुदाहरणं प्रसन्नस्य वाचां गुम्फस्य—
कान्ते फुल्लमुखाम्बुजे ! कुसुमितां, नीलेक्षणे ! सालिकाम्
आलोलायतकुन्तले ! ऽनिलसमाधूतप्रतानव्रजाम् ।
वक्षोभारनते ! फलावनमिताम्, आलिङ्ग्य मामेह्यमुं
चूताश्लेषवतीं व्रजेव लतिकां शोभां तवाबिभ्रतीम् ॥ १. १७ ॥

अयं चात्रापरो विशेषः—अत्र सुभगैरर्थवद्भिः कैश्चिद्विशेषणैः शच्याः सालिकाया लतायाश्च यत्साधर्म्यमुपन्यस्तं तदपि साभिप्रायम् । इदं खल्वभिसन्धित्सति महेन्द्रः—प्रिये पुलोमजे! यस्मात् त्वं तैस्तैर्विशेषैः, सालिकया साम्यमुपयातासि तस्मात्तद्वदाचर । सा च चूतमाश्लिष्टवती, त्वमपि मामाश्लिष्येति ।

सुकुमारता नाम गुणो वाचि कमपि सौभाग्यविशेषं निषिञ्चति । भगवती भारती यया कोमलकान्तपदावल्या कविमाशिषा आशास्ते सा किमपि रसनीया भवति—

..........वत्सक ! वचस्ते पूर्णमासीसुधा-
भानूत्तालितफेनिलाब्धिलहरीकोलाहलं जृम्भताम् ॥ १. ६ ॥

अत्र लकारस्याऽसकृदावृत्त्या घोषवद्वर्णपुनरुक्त्या च सुकुमारता बन्धस्य विजृम्भते ॥

रूपकमिदं यत्र तत्रार्थगौरवभरं बिभर्तीति शक्यमञ्जसा निरूपयितुम् । वीररुद्रस्य नायकस्य जननदिवसे कविर्नारदमुखेन यदाह तत्किमपि गुर्वर्थमिति संविद्रते कोविदाः ॥

देवो भूतपतिः स्वयं गणयुतः पुत्रं कुमारं प्रियं
पार्वत्यश्रुभिरार्द्रितेषु हिमवत्प्रान्तेष्वमृग्यच्चिरम् ।
शून्योराश्च मृशन् रमापतिरगान् म्लानिं, विधातापि च
स्वास्यं वीक्ष्य सरस्वतीविरहितं जाड्यं समालम्बत ॥ ३. ८ ॥

कोऽत्र कवेरभिप्रायः? प्रसन्नोऽयं वाचां सन्दर्भः, तथापि नान्तरा कविहृदयप्रवेशं शक्यमुन्नेतुं किमयं विवक्षतीति। कुमारो वीररुद्रमाविशति, तच्छरीरेऽवतरतीति तत्र हिमवत्यसंनिहित इति भवो भवानी च यत्र तत्र तं गवेषयतः। पुत्रवियोगाभ्यर्दिता वत्सला उमा रोदितीत्यनुक्त्वा 'पार्वत्यश्रुभिरार्द्रितेषु हिमवत्प्रान्तेष्वमृग्यच्चिरम्' इत्युक्तिवैचित्र्यं किमपि वहति। लक्ष्मीजानिर्भगवान् विष्णुरपि प्रियया विधुरितो दुर्मनस्कतामदभ्रां भजते। सा लक्ष्मीरपि श्रेयांसं समाश्रयं वीररुद्रमुपाश्रितेति गम्यते। वेधा अपि भगवत्या भारत्या विरहितं स्वमाननं वीक्ष्य जाड्यं परं व्यश्नुते। सा भारत्यपि प्रकृष्टतरमधिष्ठानं वीररुद्रात्मानमधिष्ठितवतीति गूढोऽभिसन्धिः। व्यतिकरस्यास्याद्भुतस्य परिणतिश्चतुर्थेऽङ्केऽनुभूयते। वीररुद्रं साम्राज्येऽभिषेक्ष्यन् परमेश्वरो देवान् 'पठ्यन्तां प्रशस्तय' इति यदा प्रयुङ्क्ते तदा वेधसोऽपि यदसामर्थ्यं तदनेन वृत्तेनोपपादितं भवति। अन्यथाऽनुपपन्नं सदुद्वेगाय स्याद्धीमताम्॥

अलङ्कृतयो नाम काव्यशरीरस्य शब्दार्थरूपस्य शोभां पुष्णन्तीति ताः स्वल्पापि निदर्शयामः। हृद्या अत्र कविप्रतिभोत्था उपमोत्प्रेक्षाः। तासु द्वित्रा विदग्धमनोविनोदाय संनिधाप्यन्ते—

सन्ध्यानृत्तप्रणयिपशुपत्युत्तमाङ्गोल्लसन्त्याः
स्वर्वाहिन्या विधुतपयसां तारकाश्शीकराभाः॥ १.२॥

भागवतेन सान्ध्येन नृत्तेन क्षोभं गमितानि स्वर्णद्याः सलिलानि। सायमिति ताराश्च समुन्मिषन्ति गगन ऊर्ध्वं स्थिताः। एताः शीकरवद् आभान्ति। शीकरा हि वातास्तवारिबिन्दवो भवन्ति। तस्माद्युज्यते शीकरायेरन्नेताः सचेतसश्चेतसः॥

ध्वान्तेऽन्तर्लीनास्ते तेऽर्थाः कथं मन्दमन्दं व्यक्तिमुपयान्तीत्युपमयाऽनुपमया वर्णयति कवीश्वरः—

क्रमादुन्मीलन्ति प्रकटरुचि ते ते च विषया
वराहोत्क्षिप्ताया जलधिजठरान्तादिव भुवः॥ ३.१४॥

जैत्रयात्राप्रसङ्गेन धूलिं वर्णयन् कविराह—

लसत्यप्यनन्यसाधारणतेजोराशौ रुद्रनृपतौ सावष्टम्भमुच्चैः स्थितवन्तं भास्करं स्थगितवत्यो धूलयः सर्वलोकसमक्षं तच्छ्रियं विलुप्य मालिन्यं च तं प्रापयन्तीति।

धूलयो भगवन्तं भास्करं स्थगयन्तीति लोकस्य विदितोऽर्थः सत्प्रतिष्ठः। परं नेदमहेतुकं स्थगनमिति कविरुत्प्रेक्षते—अनन्यसाधारणेन प्रतापरोचिषा दीप्यते वीररुद्रो नृपालः, तथापि सावष्टम्भमुच्चैः स्थितो भाति भास्कर इति महदिदमनौचित्यम्। एवं मर्यादामुत्क्रामन्नयं धृष्टोऽर्हति सर्वलोकसमक्षमवधीरणामिति श्रियमस्य विलुम्पन्ति धूलयः, मलीमसमुखं च तमापादयन्ति॥

अन्यत्रापि धूलिवर्णनायां किमपि रुचिरमुत्प्रेक्षते कविः—
एताश्छादितकेतुपट्टपटला रुद्धारुणा धूलयः
सामन्तं द्युपतिं विधातुमुदयन्त्यूर्ध्वं नृपाग्रेसराः॥ १.१०॥

यातो महतो नृपानीकस्य पुरःसरन्ति रजांसीति वस्तुगतोऽर्थः। तत्र कवेरियमुत्प्रेक्षाऽतीव सुन्दरी हृदयं हरति—रजसामिदमूर्ध्वगमनं द्युलोकाधिपतिसामन्तीकरणार्थं नापार्थकमिति॥

अत्र रूपके निबद्धानामलङ्कारणां भ्रान्तिमानलङ्कारो मूर्धन्यो रुचिरतमश्च। तमभिप्रायमास्वादन्तां रसज्ञाः। महाश्वेतो भगवान्रुद्रो यावद् द्युलोकमुपक्रामति तावदपूर्वः कश्चिद् धवलिमा विसरति। क्षीरपयोधौ निमग्नमात्मानं मन्यते लोकः। सर्वोऽपि पर्वतेश्वरः प्लवत इति भाति। प्लाव्यते च चित्ररथवनान्तः। वृषभध्वजं भगवन्तमासीदन्तमजानन्तो भ्रमन्ति च त्रसन्ति च वृन्दारकाः। गीष्पतिरपि इह कैलासो न, शिवोऽपि न, उल्लोलकोलाहलोऽपि नेति किमिदमिति मुह्यति। मातलिश्च भूयो भ्रान्त इत्थमाक्रोशति—

'हन्तासौ दाक्षिणात्यः क नु स मुनिवृषो वार्धिपो मृग्यतां भोः' (३.२२) इति।

अस्त्यस्यां कृतौ स्पृहणीयः कोऽपि शब्दपरिपाकः। शब्दपरिपाकं चेत्थं लक्षयन्ति साहित्याचार्याः—

यत्पदानि त्यजन्त्येव परिवृत्तिसहिष्णुताम्।
तं शब्दन्यायनिष्णाताः शब्दपाकं प्रचक्षते॥

प्रस्तावनामुपक्रममाणः कविः सूत्रधारमुखेन शरदागमं विवर्णयिषुराह—"अये! सीदत्कर्दमाः प्रसीदत्पुष्कराः, आसीदद्रजहंसाः, अवसीदन्मण्डूककटुरटनाः, उत्सीदद्दुर्दिनान्धकाराः प्राप्ता एव मानसोन्मादपल्लवयितारः शरत्समयारम्भाः।" आहितपरिपाकायामस्यां पदावल्यां नैकतमदपि पदं शक्यं परिवर्तयितुं,

पदान्तरं च साधीयस्तत्स्थाने समानेतुम् अभियोगशतेनाप्यभियुक्तैः । अयं नाम शब्दपरिपाको दैवानुग्रह एव कश्चिद्भवति ॥

इहासौ गद्यगतो दर्शितः। पद्यगतोऽपि स शक्यो निदर्शयितुम्—देवसभायाः सुधर्मीया भूतपूर्वां सुषमां निरूपयिष्यन् वाक्पतिरयं कविः सुरविशेषमुख-सङ्क्रान्तैर्वचोभिरेवमाह—

आरब्धाश्चितभित्तिबिम्बिततनुस्स्वर्वारवामेक्षणा-
दोरान्दोलितचामरानिलचलच्छैवाललोमावलिः ।
लास्योल्लासजघर्मतोयकणिकामुक्तावलीचित्रितां
देवो यत्र सहस्रदृङ् निरविशद् रम्भोरुरम्भाश्रियम् ॥ ३.११ ॥

अत्र शार्दूलविक्रीडितच्छन्दसा परिणतायां वाचि समासबहुलायामपि प्रसादः प्रवाहो मधुरिमा च समं चकासति। यो हि कविरितरो वा विदुरः पदसन्दोहेऽस्मिन्नन्यतममपि पदमन्यथयितुं समीहेत, उपस्करिष्य इति, स साहसं परं प्रक्रमेत, न च कृतार्थतां कलयेत ॥

कृतिरेषा यत्सत्यं संवननं सहृदयहृदयानाम् । स्थानेऽस्याः प्रणेता 'कविकोकिल' इति व्यपदिश्यते विशेषज्ञैः । प्रयोगार्हस्य रूपकद्वादशकस्य निर्माता सोऽयं महाभागो भवभूतिवद् 'भरतमित्र'मित्याख्यायते प्रयोगप्रवीणै रङ्गावतारै-रित्यपि साम्प्रतम् ॥

आयत्यामपि 'सन्दर्भणकुतूहली' कविरयं नूत्नानि प्रत्यग्ररसानि रूपकान्तराणि प्रणीय विद्वल्लोकमुपकारभारेणानतीकरिष्यतीत्याशंसमानो विरमति विदां विधेयश्चारुदेवश्शास्त्री ॥

देहली

श्रीचारुदेवशास्त्री

PREFACE

For my Sanskrit Honours-M. A. course, which I did in the Presidency College, Madras, in the years 1927-30, I had among my texts the Pratāparudrayaśobhūṣaṇa, known also by its shorter title Pratāparudrīya by Vidyānātha for general poetics and dramaturgy. The work, published with the commentary of Kumārasvāmin, son of Mallinātha, from Bombay and Madras, had long enjoyed vogue in the curriculum of studies in the South. For one thing, it is a compact work dealing with the whole range of poetics and dramaturgy and is thus very useful to students for getting introduced to these twin fields of study. The most noteworthy feature of this work is that it is perhaps the first work in which the author composed his own illustrative verses and also made all of them eulogies of the same person, his patron, King Vīrarudra, end of the thirteenth and beginning of the fourteenth century A. D., of the Kākatīya dynasty of Warangal in Andhrapradesh. After Vidyānātha, many imitated his plan. But it is clear that endless praise of a single subject and his prowess, patronage and other qualities produces a monotony.

The ideas of a victorious military expedition, the bright or red prowess, the pure or white fame, the sorrow or the darkness of the vanquished kings and their harem, its huge clouds of dust, the deafening noise of its war-drums, horses, elephants etc., all these worked upon *ad nauseam* began to pall and produce on the young mind a strong reaction against the poetry of Vidyānātha. Even while sitting in the class and listening to the lessons, I composed and jotted down verses parodying those in the text and a good number of such verses accumulated. As I have mentioned in the Preface to my play *Vimukti*, written on 19th May, 1931, I wrote the present play also at that time, because I felt that the small collection of verses on topics like *Rudradeva pādukā*, *a la* Vidāynātha, was hardly adequate to emphasise the nature of the later decadent Court poetry and the stock-in-trade of the authors of these panegyrical poems and stereotyped figures and fancies which they were turning out.

I dealt with this aspect of *Cāṭukāvya* in the chapter *Use and Abuse of Alankāra* in my book *Some Concepts of Alankāra Sāstra*. I felt that the point could be driven home more forcefully by a regular play parodying these characteristics of later decadent poetry and for this I took up the same *Pratāparudrīya* and wrote a parody in four Acts, called the *Pratāparudravijaya* or *Vidyānāthaviḍambana*.

The technique adopted is to extend further the stock Rūpakas, Pariṇāmas, Bhrāntimats, Utprekṣās, Atiśayoktis and Atyuktis and to make the imaginary world called up by these figures of poetry into actual facts, i.e., to put in the technical language of poetics, to make the Kavipraudhoktimātraniṣpanna-vastu into a Lokasiddha-vastu and work out the consequences of the same into a humorous theme. Thus in the Ist Act called the 'Onslaught of the Dust' of the victorious army (*Nāsīra-pāṃsu-dhāṭī*) are presented the consequences of the huge dust raised by the marching army of Vīrarudra as having actually pervaded the atmosphere, ushered in the night prematurely leading to all sorts of nocturnal activities in the City and finally invading the Heaven and producing absurd and calamitous events in the world of Indra and Śacī. The IInd Act is called the 'Advance of Darkness' (*Tamaḥ-prakrama*), the darkness being the result of the sorrow of those who had been defeated or put into different difficult situations by the great prowess of Vīrarudra. This is described with reference to both the terrestrial and heavenly spheres. The IIIrd Act is called *Asura-vijaya*, the 'Triumph of the Asuras', who exploit the situation and seize Amarāvatī, Śacī, and others. The IVth Act entitled the *Parameśvara-paṭṭābhiṣeka* or the Coronation of Vīrarudra as the Super-Lord, in the Capital of Gods themselves, the usual motif of a powerful ruler of the Earth going up to the aid of Indra in difficulty in Heaven, Mātali, Indra's charioteer, coming to take him, and God Śiva himself coming and blessing Vīrarudra's coronation are described. Thus is the humorous story built out of all these absurdities.

Like the *Vimukti* and the *Anarkali*, the *Pratāparudra-vijaya* or *Vidyānātha-viḍambana*, although written in 1931, had not been published so far, for the reasons explained in my Preface to the *Vimukti* and for the same reasons set forth there, it is now being published. The play appeared originally in the pages of *Samskrita Pratibhā*, VII. ii, 1968, and is now being brought out in a separate book-form. I am thankful to Prof. K. A. Subramania Iyer, formerly Vice-Chancellor of the University of Lucknow, for his English Foreword and Pandit Charudeva Sastri of Delhi for his Sanskrit appreciation.

Punarvasu
7—9—69
Madras

V. RAGHAVAN

OTHER SANSKRIT WRITINGS OF THE AUTHOR

PLAYS

1. Rāsalīlā
2. Kāmaśuddhi
3. Vijjikā
4. Vikaṭanitambā
5. Avantisundarī
6. Punar-unmeṣa
7. 'Āṣāḍhasya prathma-divase'
8. Mahāśvetā
9. Lakṣmī-svayamvara
10. Vimukti—Two-Act philosophical farce.
11. Vālmīkipratibhā
12. Naṭīpūjā

    (11, 12 translations of Tagore's plays)

    (All the above printed and produced on the Stage and/ or A.I.R.)

13. Anārkali—Full ten-Act play

    (produced twice on Stage ; to be printed shortly)

MINOR POEMS

(Printed)

1. Gopa Hampaṇṇaḥ
2. Devabandī Varadarājaḥ
3. Mahīpo Manunīticolaḥ
4. Sarvadhārī
5. Phālguṇaḥ
6. Kāverī
7. Ṣoḍaśī-stutiḥ (On Holy Mother, Consort of Sri Ramakrishna Paramahamsa)
8. 'Kim Priyam Kālidāsasya ?'
9. Śliṣṭa-prakīrṇakam—two instalments.

10. Kālaḥ Kaviḥ
11. Tolstoy & The Green Twig.
12. Sankrānti-mahaḥ
13. Narendro Vivekānandaḥ
14. 'Bhoḥ Kave!'
15. 'Kaviḥ, Jñānī, Ṛṣiḥ'
16. 'Kimidam tava kārmaṇam ?'
17. Viśvabhikṣu-stavaḥ
18. Śabdaḥ (a dance-composition) on Kalpakāmbikā at Mylapore
19. 'Kāmakoṭīti-kārmaṇagṛhītam ivāntaraṅgam'—Kāñcī-Kāmākṣīstutiḥ
20. Brahmapatra-vaivarta-purāṇam
21. Dambha-vibhūtiḥ

A dozen note books of unpublished pieces.

MAHAKAVYA

1. Śrī Muttusvāmi Dīkṣita Caritra : (The title of *Kavi Kokila* was conferred on Author by H. H. Śaṅkarācārya of Kāñcī for this). (To be printed shortly).

SANSKRIT ADDRESSES

(Printed)

1. To the Convocation of the Mysore Government Sanskrit Examinations, 1959.
2. To the first Convocation of the Sanskrit University, Darbhanga 1967.

SANSKRIT COMMENTARIES

(*on old classics, in traditional style*)

(Printed)

1. Ānandaraṅga campū vyākhyā
2. Āryāśataka vyākhyā
3. Snuṣāvijaya vyākhyā

TRANSLATIONS

(Printed)

1. Jawaharlal Nehru's Azad Memorial Lectures—
   India Today and Tomorrow (for National Book Trust)
2. Tagore's Natirpuja
3. Tagore's Valmikipratibha
4. Grey's Poem
5. Keat's Poem
6. Tolstoy's Story.
7. 'Ultimo Adios' of the Philippine patriot-poet H. Rizal.
8. From the Tamil poet Subrahmanya Bharati.
9. Stray pieces from English.

PROSE ARTICLES

Several prose articles in Sanskrit Journals and Editorial to each issue of the Samskrita Pratibha.

Uses of Adversity. (A long Prize Essay-to be printed).

M.L.J. Press Private Ltd., Madras-4

[नान्द्यन्ते ततः प्रविशति सूत्रधारः]

सूत्रधारः—चलत्कर्णतालस्वनैर्वैनतेया-
वतारोरुशङ्कात्रसत्तातनागैः ।
बिलाभस्वनाभिप्रविष्टैः स खिन्नो
हसद्भ्रातृरुष्टो गणेशोऽस्तु हृष्ट्यै ॥ १ ॥

अये ! सीदत्कर्दमाः प्रसीदत्पुष्कराः, आसीदद्राजहंसाः अवसीदन्मण्डूक-क्रटुरटनाः, उत्सीदद्दुर्दिनान्धकाराः, प्राप्ता एव मानसोन्मादपल्लवयितारः शरत्समयारम्भाः ।

सन्ध्यानृत्तप्रणयिपशुपत्युत्तमाङ्गोल्लसन्त्या:
स्वर्वाहिन्या विधुतपयसां तारकाश्शीकराभाः ।
किं वाद्येन्दोरपि च रुचिभिः फुल्लकाशव्रजानां
दुग्धाम्भोधीभवति भुवनं जैत्रकीर्त्या च राज्ञाम् ॥ २ ॥

अहो ! विसरदिव विभिद्यदिव विशालीभवदिव नस्स्वान्तं समन्ततः स्त्यायमानविशादिमविलासीनि दिगन्तरालान्यवलोकयताम् । हसन्निवायमखिलोऽपि लोकः । तदद्य शरत्समयेन, जैत्रयात्राप्रस्तावेन, हासप्रसङ्गचिन्तया च स्मारितोऽस्मि कञ्चित् अस्मत्सुहृदस्सन्दर्भविशेषम् ।

[सम्भ्रमेण प्रविशति अपरः ।]

अपरः—सखे ! किमत्र यत्किमप्यन्तरा उत्सुकित इव ध्यायन्निव शून्यः प्रभाषसि । किं न पश्यसि पुरतः संमिलितान् सदसि सामाजिकसत्तमान् । आदिष्टा वयं निरूपणाय समित्या—

अनश्लीलहसद्राणि निसर्गरसबन्धनम् ।
नवं लघु च यत्किंचित् विनोदाय निरूप्यताम् ॥ ३ ॥ इति ॥

सं० *

सूत्र०—[पराङ्मुखमेव] वयस्य! भवतु, अलमात्रेगेन। संबद्धमेवान्तरा चिन्तापरोऽस्मि। [सहसा परावृत्य, तमभिवीक्ष्य] अभ्यासादितं त्वया यत्किमपि रूपणीयम्।

अपरः—नहि, ननु भवानेव विषयजातविज्ञः।

सूत्र०—हस्तगतमद्य मनोरथमिव नो मूर्तं अस्मत्सवयोवाग्विलसितं किमपि।

अपरः—साधु। ही ही! को वायं प्रणेता? किन्नामायं प्रबन्धः?

सूत्र०—[उपहस्य] मुग्ध! किन्नामादिग्रहणेन?

पुरुषविशेषज्ञानात् पामरसमजेन कीर्त्यते श्लाघा।
रसिकसमाजस्य परं श्लाघाया उज्ज्वलो गुणो हेतुः ॥ ४ ॥

तथापि श्रूयताम्—कविरयमस्मत्सुहृन्मणिः

राघवो नाम यःकश्चित् सन्दर्भणकुतूहली।
स्वाचार्यपादकारुण्यकणिकोञ्छेन वर्तयन् ॥ ५ ॥

स च कदाचिदेवं वर्णयामास स्वस्मिन्भारतीसमवतारवैभवम्—

(कविः)—मातर्भारति! वीररुद्रनृपतिस्तोत्रोत्सुकं मे मनः
नन्वेतादृशनायकस्तववशात् कीर्तिर्ममैवैधते।
तन्मय्यम्ब दयस्व

(भारती)—

वत्सक! वचस्ते पूर्णमासीसुधा-
भानूत्तालितफेनिलाब्धिलहरीकोलाहलं जृम्भताम् ॥ ६ ॥

अपरः—तत्किमद्य वीररुद्राश्रितं वस्तु प्रयुज्यते! सुष्ठु, सुष्ठु।

सूत्र०—आम्, आम् (इत्यर्धोक्ते नेपथ्ये महान् कलकलः।)

अपरः—आर्य ! श्रूयताम् । किमेष उन्मुद्रः समुद्रः ? नहि नहि । कथं वा पुरानुभूतवीरजनकोपः, पुनरपि स पारावारः सति अतिरामभद्रे रुद्रे आत्मनो दुरवलेपं दर्शयेत् । अथवा

कल्पझञ्झोच्छलन्मूर्च्छत्स्फूर्जथुस्फोटिदिक्तटाः ।
अभ्रे भ्राम्यन्ति किन्वभ्राः पुष्करावर्तकादयः ॥ ७ ॥

सूत्र०—सखे, किमपरं स्यात् । उक्तचरमेव मया वीररुद्राश्रितं रूपकं प्रयोक्ष्यते इति । विजयप्रस्थानमारभ्य आसाम्राज्याभिषेकं कथावस्तु । तत्संप्रति समाप्तनेपथ्यविधानाः प्रविष्टा एव रङ्गं नटाः ।

युवराजस्य वीरस्य जैत्रयात्रा विजृम्भते ।
भूतेश्वरप्रतीतेरप्यसहिष्णुः पुरद्विषः ॥ ८ ॥

तदेहि वयमपसरावः ॥

[इति निष्क्रान्तौ ।]

॥ प्रस्तावना ॥

॥ अथ प्रथमोऽङ्कः ॥

(ततः प्रविशतः एकशिलानगरवास्तव्यौ पौरौ)

प्रथमः—आर्य, चिरात्खल्वद्योपस्थितमातिकुतूहलप्रतिपालितमस्मदन्ध्र-भूपतिविजययात्राप्रस्थानम् । अपि चतुरोऽस्यनुमितौ ? कथय, किमर्थमा-बाल्यादपि कवचहरे युवराजे वीररुद्रे, किं कारणमपेक्ष्य न प्रस्थापितो महाराजेन कुमारो विजयाय ?

द्वितीयः—लोकातीतकल्पनानल्पसामर्थ्यो भवान् । तत्कथय मन्द-शक्तये मह्यम् ।

प्रथमः—यद्रुद्रस्स्वभटान्सदा निधुवनासक्तानुदास्ते गृहे
तन्नात्यन्तमसत्तयात्र भुवने प्रत्यर्थिनां केवलम् ।
प्रस्थानोत्थितकेतुपट्टपटलैः क्षोणीरजोभी रवौ
सञ्छन्ने द्विजधर्मकर्मविलयाद्भीतोऽस्त्यसौ धार्मिकः ॥ ९ ॥

आर्य, पश्य पश्य, पुरतः स्फुरत्सहस्रकरप्रभासन्ताडितविमल-कलधौतत्सरुसमुत्थितरोचिर्भिः सृजन्निव कोटिशः प्रतिद्युतिनिधीन्, समुज्जृम्भमाणभेरीपटहदुन्दुभ्यादिवाद्यघोषश्रवणसमनन्तरमेव स्वहस्ताद् अचिरादपगमिष्यन्तीं भूमिं असह्यतयेव नखाग्रैः विलिखन्तः कुर्वन्नखिलानपि क्षोणीपतीन्, चरन्निव कुलपर्वतसङ्घः, क्षुभित इव कल्पपारावारः, रथगजतुरगपदातभारेण 'क्लेशानुभवं विना न साध्यं वीररुद्रप्रणयसर्वस्वम्' इतीव पीडयन् मेदिनीं, प्रचलति जिष्णुरितो नगरात् वीररुद्रसेनासङ्घातः॥

द्वितीयः—(निरूप्य) आर्य! क्रान्तं नगरद्वारं सैन्येन। तनूभवति सर्वं नयनस्य। केवलं घोष एव तुमुल आकर्ण्यते। अपि च पश्य, लसत्यप्यनन्यसाधारणतेजोराशौ रुद्रनृपतौ सावष्टम्भमुच्चैः स्थितवन्तं भास्करं स्थगितवत्यो धूलयः सर्वलोकसमक्षं तच्छ्रियं विलुप्य मालिन्यं च तं प्रापयन्ति।

प्रथमः—आर्य! किमुच्यते अस्मत्प्रभोर्जयशीलतां प्रति। पश्योपरि

गन्धानेकपनाथयूथविगलद्दानाम्बुसेकार्द्रिताः
धावत्प्रोद्धतघोटिकाखुरपुटोत्खातोर्व्युदग्रोत्थिताः।
एताश्छादितकेतुपट्टपटला रुद्धारुणा धूलयः
सामन्तं द्युपतिं विधातुमुदयन्त्यूर्ध्वं नृपाग्रेसराः॥ १०॥

द्वितीयः—हन्त! भूमिरेव दिवमारोहतीव। सम्यक्छादितसूर्यतया द्राङ्निष्पन्नप्रदोषमिव भुवनमाभाति। पश्य पश्य, परितोऽपि नासीरपांसुजृम्भणापादितप्रदोषस्य लोकस्य तांस्तान् नियमविकारान्॥ तथा हि—

श्यामाप्राप्तिमपेक्ष्य सम्भ्रमकृतालङ्काररागांशुकाः
जालेष्वाननपङ्कजानि दयितप्राप्त्युत्सुकास्तन्वते।
ता वेश्या वरवर्णिनीश्च नगरीरथ्याचराः कामुकाः
वीक्ष्य श्वासमुचस्स्वकीयगृहमुद्दिश्य त्वरन्तेऽधुना॥ ११॥

प्रथमः—(अन्यतो दृष्ट्वा) आर्य, इतो वामतो नयनं देहि । न केवलं वयःकुलानि नीडाभिमुखीभवन्ति, जरद्वृहद्वृक्षतः प्रसृताः कर्णारुन्तुदनादं कुर्वाणाः कौशिकाः तमश्शकला इव इतस्ततो डयन्ते । अजिनपत्राश्च सहस्रसंख्यया परितोऽपि प्रचरितुमारभन्ते ।

द्वितीयः—किं भणति भवान्? कुतोऽत्र एते अपशकुनाः शकुनयः? ते खलु अधुना समेत्य संभावयन्ति स्थिरवासेन वीररुद्रवैरिविमानान्तः-प्रदेशान् ।

लोकालोकमहीधरार्धमभवत् ध्वान्ताभिभूतं चिरात्
तस्मिन्नुन्मिषदन्ध्रभूपतिमहातेजोभिरुद्दीपिते ।
विस्रब्धात्रसथप्रचालितगिरित्वक्पत्रसङ्घा द्रुताः
सोलूका मथितारियूथभवनान्याप्लावयन्ति द्रुतम् ॥ १२ ॥

पश्य, पश्य (इत्यन्यतः दृष्टिमावर्जयन्) मार्जारांश्चेतः कपटाकुञ्चितपादान् मन्दमन्दं क्रममाणान् । बहिस्सरति च महती मूषिकपरम्परा । आर्य! पश्य—

किमिति कथयाम्याखुस्त्रीणां गृहेऽन्ध्रपतेः श्रियं
त्रिपुलविवराभ्यन्तर्गोणीशताहिततण्डुलान् ।
गुडघृतघटान् मार्जारेशास्समीक्ष्य पलायिताः
अनुमितिरसास्स्वान्रक्षन्तस्स्तुवन्ति च पायसम् ॥ १३ ॥

[नेपथ्ये उदेति घण्टारवः ।]

प्रथमः—(श्रवणमभिनीय) अपि शृणोत्यार्यो घण्टारवं, बुभुक्षापीडितो देवपूजकोऽसौ शीघ्रायातप्रदोषमभिनन्दमानः निवेदनान्नलोलुपतया शिवायतने पूजां त्वरया निर्वर्तयति ।

द्वितीयः—(उपहसन्) वीक्षतामार्य एतानाकुलान् इह श्रोत्रियान् ।

अलिन्देष्वत्रैव श्रमपरिजिहीर्षात्तशयनाः
वहन्तस्संभुक्तं जठरपिठरे नो परिणतम् ।
मृशन्तस्तुन्दाग्रान् अनभिलषितोद्घाटितदृशोऽ-
परां सन्ध्यामुद्यन्त्यलसमलसं सेवितुममी ॥ १४ ॥

अपि च अद्याहमेवं मन्ये भवति भाषणं दिवि मिथः शचीदेवराजयोः—

किं ते पौलोमि दुःखं? प्रिय किमिति परं म्लायते कल्पवृक्षैः;
मा भूदस्माद्विषादः कुवलयसरसीमेहि संभावयावः ।
किं वा तत्राह्वि? मुग्धे विकसितसुषमैवाद्य सा चित्रमेतत्
चित्रं किं त्यागिवीरक्षितिपतियशसा प्लाव्यते सर्वलोकः ॥ १५ ॥

प्रथमः—(आकाशे लक्ष्यं बद्ध्वा) आर्य! आस्तामयमिह लौकिको विकारः । उपर्यालोकय—

नृत्ताय सन्नह्यति चन्द्रमौलिः हसत्यमुं वीक्ष्य नगेन्द्रकन्या ।
सायंविधेः प्राप्य महर्षयोऽपि मुह्यन्ति दृष्ट्वा द्युनदीं मृदक्ताम् ॥ १६ ॥

तदस्तु, यथा तथा वा उपरि स्वर्लोकवृत्तान्तः । एहि नगरीमेव सर्वां विपर्यस्तविधिविचित्राचारां विलोकयन्तौ आत्मानं विनोदयावः ॥

(निष्क्रान्तौ ।)

[इति शुद्धविष्कम्भकः]

[ततः प्रविशति नन्दनवनं महेन्द्रः पुलोमजया सार्धम्]

इन्द्रः—(शचीमाहूय)

कान्ते फुल्लमुखांबुजे कुसुमितां, नीलेक्षणे सालिकाम् ,
आलोलायतकुन्तलेऽनिलसमाधूतप्रतानव्रजाम् ।
वक्षोभारनते फलावनमिताम्, आलिंग्य मामेद्यमुं
चूताश्लेषवतीं व्रजेव लतिकां शोभां तवाबिभ्रतीम् ॥ १७ ॥

[चूततले शिलापट्टके उभावप्युपविशतः]

(पतिकृतकण्ठग्रहा शची)

शची—नाथ! किमेतदद्य माध्याह्निकतापापनोदनाय धारागृहं गतवत्याः मे रभसा अज्ञातं कालोऽपयातः, भवदीयकरवल्लीसमाश्लेषदायी प्रियः प्रदोषश्च आपतितः शीघ्रमेवेति निर्भरानन्दा चित्रायितास्मि।

इन्द्रः—प्रिये! ममाप्यस्मिन् विषये कश्चिदासीदेव वितर्कः। आकालिकसूर्यास्तमयमाकलयतः चिन्ता मे क्षणमाविरभूत्। तथापि किं चिन्तया, वर्तते सन्ध्यासमयः मदनाधिकारमनोहारीति त्वामेव, वरारोहे, स्मारितस्सन् नन्दनमागमम्।

शची—आस्तामास्तां प्रियंवदक! किमद्य सत्यं सन्ध्या वर्तते? (समन्ततः उभौ निपुणं वीक्षेते) (शिलापट्टकादुत्थाय)

इन्द्रः—सत्यमाह भवती। इतः पश्य पांसूत्करजम्बालितविटपान् अनुत्फुल्लकुसुमान् वीक्ष्य वृक्षान् अनासादितहेतिसम्भारः विषीदन्निितो याति कुसुमायुधः।

(शची नेत्रे कराभ्यां पीडयति। अश्रूणि च पटाञ्चलेन उन्मार्जयति।)

इन्द्रः—(शचीं विलोक्य) हा प्रिये! किमापतितं ते नयनयोः! (इति विह्वलां तां गृह्णाति।)

शची—हन्त! नाथ! हा प्रिय नाथ अक्ष्णोर्मे पांसूपरोधः।

इन्द्रः—(स्वोत्तरीयेण बाष्पक्लिन्नं प्रियामुखं परिशोध्य स्वमुखानिलं च तन्नेत्रयोरर्पयन् किंचिदिव स्मितेन) अहो! दशावैषम्येऽपि लक्ष्मीपोषः—

उद्गलितनयनवारिप्लावितगण्डं शशिशिलामनोरम्यम्।
अयमपि चपलचकोरः तृष्णालोलं बिभर्ति वदनाग्रम्॥ १८॥

(इत्युन्मुखीभवति चुम्बनाय; महान् वाति वायुराकर्षन् रेणुपुञ्जम्, सहसा स्वयमपि महेन्द्रः उत्प्लवन् इतस्ततो धावति।)

इन्द्रः—(परावृत्य) प्रिये! प्रिये! अहमपि पांसुभिः पीड्ये । हा! कथं मम नयनानि दूयन्ते । आः कष्टम्! (इति क्रन्दन् इतस्ततो धावति ।)

शची—हा प्राणनाथ! क्वासि, न पश्यामि भवन्तम् ।

इन्द्रः—इन्द्राणि! इतोऽस्मि मन्दभाग्यः । एतावत्कालं एकपद एव सर्वास्वपि दिक्षु लसन्तीः स्वर्वारवामेक्षणा अनुभूय सहस्रलोचनदानाय महर्षि प्रतिपदं वन्दमानोऽभवम् । हा धिक्! कुटिलाशयान् मुनीन्! अद्य पश्यामि गौतमस्य दृष्टिकौटिल्यम् । अन्तःप्रविष्टरेणूनि अक्षीणि मे घुरुघुरायन्ते, हन्त घुरुघुरायन्ते । (इति भ्रान्तो धावति अमितः ।)

शची—हा कष्टम्! अब्रह्मण्यम्! न शक्नोमि चक्षुषी उन्मीलयितुम् । पातालमिव बहिर्वर्तते । हा प्राणनाथ! किमापतितं ते? कुत्रासि? (इति क्रन्दन्ती कुत्रचिद्धावति ।)

इन्द्रः—अरे रे उद्यानपालिकाः! शीघ्रं गच्छत । द्वाराधिकृतान्निवेद्य अश्विनीकुमारावानयत । हा हा न सहे न सहे । (इति हस्ताभ्यां नयनानि निष्पीडयन्नधिकीकरोति वेदनाम् ।) हा मत्पातकस्य फलमद्यैवानुभवामि । धिक् धिक् सहस्रलोचनतां मे । ओषधीपते! अमृतकिरण! क्वासि! प्रिये प्रिये! कुत्रासि? तुहिनज्योतिषमानय । (इति प्रधावन्नपक्रान्तः ।)

(शची च धावनवशात् तान्ता नष्टदृष्टितया भ्रमणे क्वचित्क्रीडासरसि पतति ।)

शची—(हन्तेति अक्षिणी उन्मृज्य जलेन) हन्त! किमेष अपूर्व उत्पातः चक्षुषां, यद्भवनैकचक्षुरपि नालोक्यते । (इत्यर्धोक्ते परावृत्य पश्यति सरसि परिपतति धूलिजालम्) हा, कथं क्षणात् सरोऽपि चुलुकिताम्भः कर्दमप्रायं जातम् । अब्रह्मण्यम् अब्रह्मण्यम्! दृढीभवति पङ्कोत्करः । कथमुत्तिष्ठेयम् । प्राणनाथ! उद्यानपालकाः, नाकलोकवासिनः! हा

त्रिभुवनैकगुरो शङ्कर! (इति आवलग्नं भूम्यन्तःस्थिता हस्तौ विक्षिप्य क्रन्दन्ती मुह्यति ।)

॥ इति नासीरपांसुधाटी नाम प्रथमोऽङ्कः ॥

॥ अथ द्वितीयोऽङ्कः ॥

(कस्यचिदरिभूपतेर्नगरप्रान्ते अरण्यम् । तत्र च शरणं गतं राजकुलं वीररुद्रेण अपराष्ट्रीकृतम् ; प्रविशति वनदेवता ।)

वनदेवता—(पर्याकुलाक्षी परितो वेपमाना) कुतो हुम्भाभिः ताम्यन्ति गावः? मृगकुलं च पर्याकुलं धावति? भिन्नसमाधयो योगिनोऽपि कन्दादीन-लभमानाः जलेन वातेन च वर्त्तयन्ति । किमियमापदापतिता मे वनान्ते? (अन्यतः क्वचित् संभ्रमेण गत्वा सखीमाह्वयति ।)

(प्रविशति सखी)

सखि! किमेतत् अवस्थावैषम्यमिह?

सखी—हला अस्ति भूमौ कश्चिद्राजा ।

वनदे०—कुत एकः, बहवो वर्तन्ते... ।

सखी—बहव इति तत्पुरावृत्तम् ; अद्य एक एव ।

वनदे०—हुम्! किं तस्य?

सखी—मा मा उपहस । केवलं राजेति मात्रं भणामि, यतः

तस्मिन् 'जहात्यतिशयोक्तिरलङ्कृतित्वं
न्यूनोपमात्वमुपयात्युपमापि सर्वा' ।
वस्तुस्थितिप्रकलनं च न साध्यमेव
तस्मिन्नभूतचरतादृशचित्रभूमौ ॥ १ ॥

युवैवैष संप्रति विश्वजित्सत्रसमारम्भणकुतूहली पारमैश्वर्यप्रतिष्ठार्जनेन स्वं नाम रुद्र इति अन्वर्थं कर्तुमुद्यतः ।

वनदे०--(किंचिदिव कुपिता) तत्प्रवर्ततां नाम विश्वजिते, नाकजिते वा, किमनेन नः ?

सखी--तत्कृतैषा दुरवस्था नो वन्याः ?

वनदे०--(विस्मयविशालनेत्रा) कथं कथम् ?

सखी--तेन स्वस्थानतो भ्रंशिता राजानः, पश्य, अत्र वनभागममुं शरणं गताः ।

वनदे०--व्रजन्तु नाम शरणं, तत् कुतो वेयं पीडा वननित्यवास्तव्यानाम् ।

सखी--मा कुप्य । मा मा प्रकटय एवमुच्छ्रायम् । उद्रिक्तं स्थावरमपि न सहते स महीपतिः । शृणु, एते नृपा अपपदा ह्यः केचन फलादिभिराहारमकुर्वन् । अन्ये केचन फलादीन्यलभमानाः सर्वमपि तृणं भुक्तवन्तः । अपरे केचित् तलोपरि किंचिदपि नासादयन्तः कन्दादिमृगयया भूमिमखनन् । पश्य ! पश्य ! अधस्तात् वराहकुलघोणोत्खाता इव गर्ताः तत्र तत्र विलोक्यन्ते ॥

अपि नास्त्येवंप्रभावस्य कापि कारा निजराजधान्यां अमून् वन्दिनः प्रक्षेप्तुम् ?

सखी--भगवति !

जिष्णुश्रीवीररुद्रप्रमथितधरणीपालवन्द्यङ्गनानां
भूरिश्वासोष्णवातैरधिकमभिहतेष्वुत्स्फुटद्भित्तिकेषु ।
कारावासेषु तत्तन्नवनवरचनाव्यग्रिता वेश्मकाराः
तान्ता हन्त स्ववृत्तिं विजहति च दिशो विद्रवन्त्यन्ध्रपुर्याम् ॥ २ ॥

(प्रविशति नन्दनवनदेवता)

नन्दन०--हला ! अपि कुशलं सख्याः ?

वनदे०—हला! ईदृशं मे कुशलम्! पश्य वीररुद्रो नाम राजा कश्चित्, जैत्रयात्राप्रचलितः किल। तत्कारितानर्थाकुलं वनं दृष्ट्वा अत्यन्तं रुग्णहृदयास्मि।

नन्दन०—हला! वृत्तान्तमेनमन्तरा ममाप्यस्त्येव भूयान् हृदय-परितापः। ह्यः मध्याह्ने सहसा पांसुनिकरपरिपाटलिता मे कल्पकादिपादपाः समालम्भिता जम्बालमालिन्यम्।

सखी—कथमद्याप्यमरवनिकायामङ्घ्रिपाः! चिरात् अपगतकल्पकानोकहा अनेहसमेतावन्तं अतिशोचनीयास्ति कीर्णकान्तारोषरस्थलीवेति खलु श्रूयते।

वनदे०—किम्?

सखी—किमन्यत्?

तादृक्षस्य प्रभवमनिदंपूर्वविश्राणनश्री-
श्लाघस्यान्ध्रेशितुरिह भुवि श्राविताःस्वर्द्रुमौघाः।
ये तत्सेवारुचिविरचितैकाश्मवासास्तदीया
एधायन्ते विटपनिचयास्तत्पुरीपक्कणेषु॥ ३॥

वनदे०—(नन्दनवनदेवतां प्रति) भवत्वियमतिभाषिणी प्रलपन्ती। हला! कथय कथय त्वं स्वर्लोकवृत्तान्तस्य। ततः—

नन्दन०—सहस्राक्षोऽपि धूलिभिः अतिमात्रं दूयमाननयनः, मत्तो निर्गतः, अश्विनीकुमाराभ्यां शतभिषङ्नाथेन च चिकित्सितः, पर्याकुलैः सर्वैरपि दिविषद्भिरुपास्यमानः, अतिकरुणदशायामद्य वर्तते। अद्यापि न निवृत्ता तत्पीडा। शोकविकलीभूतं सुरलोकं दुःखं वीक्षमाणा असह्यतया तदवस्थायाः, मनोविनोदार्थं त्वामुपागतोऽस्मि।

सखि! सर्वोऽप्ययं काकतीयविभोः तस्य विक्रमप्रक्रियाक्रमः।

वनदे०—हला ! कीदृशोऽयं प्रतापो वीररुद्रस्य ! कियान् विषादो महीपतीनामेतेषाम् ! (इति वदन्त्यामेव तस्यां सहसा मूर्च्छन्ति ज्वलनानिलाः।) सख्यौ ! कथं आनला अनिलाः प्रचरन्ति । (पुनश्च निरूप्य) अकाले तमश्च परिजृम्भते ।

सखी—किमन्यत् ?

प्रतापरुद्रोन्मथितारिभूमिपाः
तदीयविश्लिष्टनितंबिनीजनाः ।
समेऽत्य दुःखार्णवमज्जितास्ततः
तमांस्यमून्यूष्मलवायवोऽप्यमी ॥ ४ ॥

वनदे०—हन्त ! उद्धृत्य पातालेन आव्रियत इव जीवलोकः । कथम् आत्रिदशालयमन्धतमसमलीमसमवलोक्यते—

कालाम्भोधरपटलैरिवावृतं खं
रक्षांसि प्रविचरितुं समारभन्ते ।
क्रन्दन्त्यभ्यधिकमपीह कौशिकौघाः
कीदृक्षा विपदियमुत्थिताऽधुना नः ॥ ५ ॥

तदेह्येहि, दृष्टिर्लुप्यते । ओषधिसन्निवेशस्थलीं गच्छामः ॥

सखी—यदि तत्रापि ज्योतिः स्यात् !

[निष्क्रान्ताः सर्वे ।]

(विष्कम्भकः)

(ततः प्रविशति शयानो महेन्द्रः पार्श्वोपविष्टैः अश्विनीकुमार-सुधांश्वादिभिः चिकित्स्यमानः, सपरिवारः ।)

काञ्चुकीयः—

सर्वत्राङ्गं पलितधवलं राजतद्योतमीक्षे
जीर्णं बद्धं वलिवलयकैः रज्जुभिर्दार्ढ्यहेतोः ।
एतत्कार्श्यं परिणतिकृतं लाघवं मन्यमानः
भोक्तुं योग्यं श्लथमपि वपुस्तर्कये तृणमहिम्ना ॥ ६ ॥

हन्त! अस्यापि महेन्द्रस्य एतादृशतृष्णामेव विपत्तेः कारणं पश्यामि । शापावाप्तसहस्रनयनानि सन्ध्यामुखपाटलानि अन्तः-क्वाथतुन्नानि उच्छूनप्रान्तानि उन्मीलनासहानि अद्य बिभर्ति । अथ को वायं पांसुप्रचारः, येनायमन्धीकृत इति अद्यापि न ज्ञायते । असुरोपरोध-भीतिगृहीतमेरुगुहावासैरुज्झ्यमान इव सुरैः अद्य निष्प्रभोऽयं स्वर्गलोकः । पांसूत्पातसमये नष्टा देवस्य महिषी क्व वर्तत इति ज्ञातुं प्रेषिताः चरा अद्यापि न प्रत्यागताः । तदेष प्रियावियोगः प्रमोर्व्यसनमुद्वेलयति ।

(ससंभ्रमं प्रविश्य चरः)

चरः—निवेद्यतां निवेद्यतां नाकलोकनाथाय वार्ताहर उपायात इति ।

काञ्चु०—बाढम्, तथा । (इति महेन्द्रमुपसृत्य) स्वामिन्! चरः कश्चिदुपायातः ।

बृहस्पतिः—तदविलम्बं प्रवेशयैनम् ।

काञ्चु०—आर्य! तथा । (इति गत्वा चरं प्रवेश्य) अयं स्वामी, उपसर्पतु भवान् ।

चरः—जयतु महेन्द्रः ।

बृह०—जिष्णो! पौलोमी-(इत्यर्धोक्ते)

इन्द्रः—आः! प्रिये, आलिङ्ग माम् । हन्त! कथं न पश्यामि ताम् ।

बृह०—शचीपते! पौलोमीवार्ताहरः प्राप्त इति मया च वक्तुमुपक्रान्तम् ।

इन्द्रः—का वार्ता, कथ्यताम् ।

चरः—तत्तत्कार्यं परित्यज्य स्वजनं च विस्मृत्य केवलं देवव्याधिचिकित्सापर्याकुले सत्यस्मिन्स्वर्गलोके, देवावरोधे च देवपादसपर्यार्थम् इतस्ततोऽत्रैव त्वरमाणे, पांसूत्पातदिने नन्दनवने पांसुपूरणदृढीकृतकर्दमे कस्मिंश्चित् क्रीडासरसि पतितायाः उत्थातुमक्षमाया राज्ञ्याः न कोऽप्यचिन्तयत् । अथ परिजृम्भिते अन्धतमसे अञ्जनेन रोदसि परिलिप्ते, कदर्थितप्रभे मरीचिमालिन्यपि विषादापनयनाय कुहचित् कोणे विलीने, छिद्रान्वेषिभिरसुरैः संघीभूय सह रक्षोभिः अमरावतीस्थगनाय बहिरायातम् । मार्गे च नन्दनवने, वनदेवतयापि त्यक्ते, तैरालोकि सा विषमदशापन्ना अमरावतीमहिषी । ततस्तैः, 'भवतु इमामपवाह्य देवेन्द्रविजये पणं कुर्मः' इति पर्यालोच्य आक्षिप्यत पौलोमी ॥

(सर्वे विस्मयस्तब्धास्तिष्ठन्ति ।)

इन्द्रः—आः ! कथम् ? अपवाहिता प्रिया दैत्यैः । हा हतोऽस्मि मन्दभागः ॥

बृह०—महेन्द्र ! मा मा अधिकं सन्तप्य । मा मा भवानश्रुभिः व्यथाम् अधिकीकृत्य ॥

इन्द्रः—स्वामिन् सुरगुरो, पौलोमीप्रत्याहरणाय प्रयोगः क्रियताम् । दयितामुखचन्द्रालोकनेन, मन्ये, सुधाभिरालिप्तं नयनम् अपोपद्रवं भवेदिति ॥

चरः—गुरो ! प्रयोग इति मनसा चिन्तयितुमपि नावकाशोऽद्य । बहिर्लोकः परितः प्रसरता तमसा व्याप्यते । अचिरेण स्वर्गलोकोऽपि पातालं भविष्यति । अपि च वान्त्यूष्मला वायवः । एतादृशे काले, को वा बहिर्जिगमिषति, गन्तुं वा ईष्टे ॥

बृह०—अथ कुत इदम् आकालिकं तमः, किंकृता अमी अनलसमीराः ?

चरः—भगवन्! न ज्ञायते। भूमौ केनापि अद्भुतेन भवितव्यम्, यतः तत एव उपचीयमानमालोकितमिदं तमः ॥

(तमः प्रविशति।)

सर्वे—कथं प्रदोष इव दृश्यते! नास्तशिखरगतो भास्वान्, नापि भगवती शर्वरी उन्निद्रा।

(संभ्रमः। क्रमेण मन्दीकृते प्रकाशे सुधर्मा तमसि मज्जति ॥)

इन्द्रः—आचार्य! किमिति अक्ष्णां क्षेममिव प्रेक्षे। न दूये विवृतलोचनः ॥

बृह०—(हस्तौ प्रसारयन्) मघवन्, कुत्रासि? अपूर्वं किंचिदापतितम्। अश्रुतचरमिदं भौममद्भुतम्। अदैवतमिति विस्मितोऽस्मितराम् ॥

इन्द्रः—स्वामिन्, किमिव?

बृह०—आकालिकः प्रलय इव परितोऽपि वर्तते। न शक्नुमो वीक्षितुम्। उपहतानि चक्षूंषि। प्रसृमरश्च उष्णो वायुः ॥

इन्द्रः—गुरो! किं तमःप्रचयः! किंकुर्वाणाः प्रभानिधिप्रभृतयः?

चरः—प्रभो! प्रभानिधिरिति! चिरात्खलु तेन विलीनं मेरुकन्दरे। एवं सत्यां तत्कथायां, किमुच्यते ज्योतिरन्तराण्यन्तरा। सर्वथा नष्टा वयम्। समयश्च अनुकूलः प्राप्तो दानवहतकानाम्। निशाचरैः संभूय महता सैन्येन (इति वदत्येव तस्मिन् नेपथ्ये कलकलः) हा! हतास्स्मः। श्रूयतां श्रूयताम्—

उत्फीट्कारमुखैः गजेन्द्रनिकरैः कल्पाटवी भज्यते
हेषाघोषतरङ्गराजिभिरमी ध्माता दिगुल्लोचकाः।
भेरीडिण्डिमतूर्यशङ्खपटहध्वानैः श्रुतिस्स्थग्यते
मन्ये नूनमुपैति देवनगरीरोधाय सैन्यं द्विषाम् ॥ ७ ॥

बृह०—वज्रिन्! किं कुर्मोऽद्य? भवान् रुग्णः। लोकश्च तमसा हतः। परिचितं पलायनमपि दुःसाधं भाति। हन्त! अद्यप्रभृति सुधर्मायां शुक्रसनाथाः दैत्या विराजिष्यन्ते। अद्य पठिष्यते नः चरमश्लोकः॥

इन्द्रः—देवगुरो! अपि सत्यमभिद्रुग्धा वयमसुरैः इन्द्राण्यपवाहकैः? प्रतियोद्धुमपि न युक्तम् पौलोमीमङ्गलाशंसिभिरस्माभिः। सर्वथा सन्धिमेव समीचीनं पश्यामि॥

बृह०—मरुत्वन्! गतमस्मद्यशः। परितो नेदं तमः, किन्तु अस्मदपकीर्तिरेव। (इति वदत्येव सघोरघोषं दैत्यपतिः प्रविशति सुधर्माम्। सर्वे भयविह्वलाः तिष्ठन्ति।)॥

दैत्यपतिः—आः! क्वायं स देवेन्द्रहतकः। कुत्रास्ते स द्विजपाशः सुरगुरुः। आः! तिष्ठत जर्जरनिर्जरकीटाः!

सर्वे देवाः—हा! अब्रह्मण्यम्! अब्रह्मण्यम्!

(संभ्रमः, कोलाहलः।)

[निष्क्रान्ताः सर्वे]

॥ तमःप्रक्रम इति द्वितीयोऽङ्कः॥

॥ अथ तृतीयोऽङ्कः॥

मातलिः—हन्त! केयमनर्थपरम्परा त्रिविष्टपस्य। सत्यमभियुक्ता वदन्ति 'छिद्रेष्वनर्था बहुलीभवन्ति' इति। न जाने किमवस्थो देवसमूहोऽधुनेति। एतस्मिन्महातमसि कालमेघमेदुरं दैत्यारिम् आसादितुं न शक्यते। किं करोमि? (इति विचिन्त्य) भवतु, हिमाचलं गत्वा रुद्रं महाश्वेतमानयामि॥ (इति परिक्रमते।)

(ततः प्रविशति नारदः)

नारदः—मातले !

मा०—केनाहमाहूये ?

ना०—देवसूत !

मा०—तामिस्रे न कमपि पश्यामि । अपि स्यात् काचित् नृशंस-दैत्यवञ्चना ॥

ना०—(उपसृत्य अंसे मातलिं स्पृशति; मातलिरुत्कम्पते) अलं मातले संभ्रमेण, नारदोऽहमस्मि । अलमलं सन्देहेन ॥

मा०—स्वामिन् ! कल्याणकन्द ! नमति महेन्द्रसारथिरयम् ।

ना०—(तदक्षिणी प्रमार्ज्य दृष्टिमुत्पाद्य) वत्स ! कल्याणं ते भूयात् । अलं कैलासयात्राश्रमेण । तत एवाहमागतोऽस्मि । कतिचिद्दिनानि तत्रैव मे जगदादिमिथुनमुपवीणयतो वास आसीत् । दृष्टं च मयेदमद्भुतोज्जृम्भणम् । तत्कारणं च भगवता स्पष्टीकृतमष्टमूर्तिना ॥

मा०—कथमिव ?

ना०—काले वो निवेदयिष्यति स एव भगवान् भवः । अद्य प्रस्तुतं चिन्तयावः । देवेन्द्रविपत्तिं समाधिनाऽऽकलयता पशुपतिना आदिष्टं "नास्त्यन्य उपायः । नारद ! गच्छ, मातलिं भूलोकं प्रेष्य महीनाथं वीररुद्रं मद्भक्तमानय । मङ्गलं सर्वं परिणमिष्यति" इति ॥

मा०—आश्चर्यम् ! महीनाथं, वीररुद्रम् ! अथ कोऽयं महीनाथो वीररुद्रः ?

ना०—मातले ! अनभिज्ञोऽसि निर्माणवैचित्र्याणाम् । अस्ति भूमण्डलललामभूता न्यक्कृतादिविषत्पुरलक्ष्मीः, नगरी एकशिला नाम अन्ध्रेषु । तत्र विद्योतते संप्रति प्रतिपन्नदिग्विजययात्रः नाम्ना वीररुद्रः काकतीयकुलदुग्धाब्धिकौस्तुभः । यस्य च जन्मदिने—

सं० **

देवो भूतपतिस्स्वयं गणयुतः पुत्रं कुमारं प्रियं
पार्वत्यश्रुभिरार्द्रितेषु हिमवत्प्रान्तेष्वमृग्यच्चिरम् ।
शून्योराश्च मृशन् रमापतिरगान्म्लानिं, विधातापि च
स्वास्यं वीक्ष्य सरस्वतीविरहितं जाड्यं समालम्बत ॥ ८ ॥

तत् स एवैकोऽद्य त्रिभुवनेऽपि, येन स्यात् देवोद्धारः । तत् त्वरस्व महेन्द्ररथेन ॥

मा०—जैत्रयात्राव्यापृत इति आख्यायि भवता । तत्क वा तं प्रेक्षे ?

ना०—मातले ! आजलधिकल्लोलकोलाहलभरितवनकुञ्जान्मलयाद् आ च लोकालोकमहीधरमवनीमखिलामेव अवजित्य, गुरुगौरवादुपेक्षितकैलासो हिमवत्प्रान्तविरचितवासभूमिष्ठं वसत्यद्य मानसोन्मादकाप्लवनापहृतप्रचरणखेदयोधः, प्रतिगजशङ्कास्थगितपर्वतेश्वरैकटकसेनाकरीन्द्रः, विद्याधरमिथुनोद्गीतनिजनामोत्कर्षश्रवणकण्टकितलज्जितवदनः, गिरिगुहाविश्रान्तः पारीन्द्र इव ।

मा०—स्वामिन् ! विस्तृतास्ता हिमालयभूमयः । अदृष्टचरश्च राजा, शीघ्रं च गन्तव्यम् ॥

ना०—सत्यम्, अनेन लक्ष्येण लक्षयेथाः । पर्वतभागो यत्र प्रतापोष्मा यशश्चन्द्रिकेत्युभयसंमेलनेन चित्रसमशीतोष्णो भाव्यते तत्र वर्तते स महाभागः ॥

यत्रैकत्र क्षितिधरतटेष्वा झरिण्यायमानाः
आलोक्यन्ते हिमपृथुभराः अद्रिशृंगावतंसाः ।
तीरोपान्तस्फुरितमहसामोषधीनां मयूखैः
संकर्षन्तो बहलितरुचींस्स्थूलरत्नोपलांश्च ॥ ९ ॥

मा०—अस्त्येव फालेक्षणस्य चन्द्रशेखरस्य समीपे एवंगुणा भूमयः ।

ना०—तदपरं चिह्नं कथयामि ।

क्वचित्फुल्लं पद्मं क्वचिदपि च फुल्लं कुवलयं
स्फुरत्सूर्याश्मानः क्वचिदमृतरुक् चान्द्र उपलः ।
क्वचित्कोकद्वन्द्वं प्रमुदितचकोरीं च निकषा
विरुद्धानामेवं पथि निलय एकस्तव भवेत् ॥ १० ॥

मा०—आम् । अस्ति तस्यैव सूर्येन्दुलोचनस्य भगवतो भवानीपतेः पुरतो विरुद्धानामेवमेको निलयः ॥

ना०—हन्त! कथमद्यापि अलक्षकं भवति वर्णनम्! सुरपतिसूत! एतादृशं पशुपतिपरिसरमपहाय स्थानमपरं यदद्रौ तदेव वीररुद्रस्थानम् ॥

मा०—आः! गृहीतं लक्षणम् । तत्साधयामि । भगवन्! भवानपि अमरावतीवास्तव्यानाम् आश्वासनाय प्रवर्तताम् ॥

ना०—बाढम, त्वरस्व । शिवास्सन्तु पन्थानः ॥

[निष्क्रान्तौ]

[विष्कम्भकः]

[ततः प्रविशतः द्वौ देवौ, विशीर्णायां नन्दनवन्यां कुहचन निलीनौ ।]

प्रथमः—सखे, हेतिहतमूर्धतया विकलश्रवणेन्द्रियोऽहम् । तत्कथय, किमद्यापि श्रूयते दितिसुतबलकोलाहलः ?

द्वितीयः—अस्ति अद्यापि कोलाहलः । न जाने कस्यां दशायाम् अमरावती वर्तते इति । किमद्यापि नेदं हतमन्धं तमो विरतम् ?

प्रथमः—वयस्य! मन्दं भण मन्दं भण! स्वरानुपातिनो दानवा आवां गृह्णीयुः ॥

(दानवनाम श्रुत्वा अपरः उत्कम्पते । प्रविशति कश्चिदपरः सुरः ॥)

(कर्णे) सखे ! समीपे पदशब्द इव । केनापि दानवेन स्यात् श्वासो निरुद्ध्यताम् । अन्यथा तेन श्वासोपघातो नौ भवेत् ॥

(तृतीयसुरः स्वयम् असुरभिया मन्दमुपसरति ।)

द्वितीयः—हन्त ! उपसृतो राहुः, ग्रस्ता च नौ ग्रीवाकला ।

तृतीयः—हन्त ! स्वर इवात्र कस्यचित् । अपि स्याद् विरोधिनः ?

प्रथमः—भोः सत्यं विरोध्येव, तदेहि सखे, निभृतं सरन्तौ....

तृतीयः—हा शत्रुः, शत्रुरत्र (इति भिया धावति, तथैव तौ च धावतः, अन्ते त्रयोऽपि सङ्घट्टमाप्नुवन्ति ।)

सर्वे—(प्रत्येकं) हा हतोऽस्मि । असुरः असुरः ! (सर्वे श्रुत्वा) कथं सर्व एव मित्राणि वयम् ॥ (दीर्घं निश्वसन्ति । नवं प्रति)

प्रथमः—सखे ! किं किं वृत्तम् आ असुरोपरोधोपक्रमात्, तत्कथय ।

तृतीयः—व्याधित एव महेन्द्रः आक्षिप्य कारागृहे क्षिप्त इति, तत्तद्देववाराङ्गनाः बलात्कृत्य अपनयद्भिः असुरापशदैः महान् आमोदकोलाहलोऽकारि । अपि च सुधर्मायां सजग्धिसपीत्यादिभिः अशिवैः रुतैः शवभूमाविव शिवा आरवान् कुर्वन्त्यस्मद्द्विषः । सुप्रतिष्ठितश्रीकं सहसाऽभाग्यपरिवर्तितलक्ष्मीकमवलोक्य अति हि नाम जृम्भते शोकः असाधारणः । (इति साश्रु किंचिदिव स्मृत्वा सगद्गदं) सा तादृशी देवसभा ! ।

आरत्नाञ्चितभित्तिबिम्बिततनुस्वर्वारवामेक्षणा-
दोरान्दोलितचामरानिलचलच्छैवाललोमावलिः ।
लास्योल्लासजघर्मतोयकणिकामुक्तावलीचित्रितां
देवो यत्र सहस्रदृक् निरविशत् रम्भोरुरम्भाश्रियम् ॥ ११ ॥

सा संप्रति अनालोकनीयाम् अवस्थां नीता ॥

प्र०; द्वि०—हन्त भोः (इति विषादं नाटयतः)

तृतीयः—हन्त! यत्र—

सुमामोदमेदस्विवायौ निकुञ्जे व्यहारि प्रमत्तैः शिखण्डीन्द्रचक्रैः ।
अहो तत्र संप्रत्यमी क्रोष्टुसंघाः दधत्युच्चकोलाहलं विद्धकर्णम् ॥ १२ ॥

(इति वदति तस्मिन् समुन्मीलति समन्ततः तेजः । सर्वे विलोकयन्ति ।)

प्रथमः—वयस्यौ! अस्मदिष्टं रोचिरुदेति ।

द्वितीयः—किमेतत् ? एवमाश्चर्यं बद्धश्रेणि अनुबध्नाति ।

तृतीयः—(निपुणं निरूप्याधस्तात्) ज्योतिरिदमुद्भवति ।

अनायाते स्वर्णक्षितिधरगुहान्तश्शरणतः
महोमूर्तौ तस्मिन् कथमुपहतं संप्रति तमः ।
कुतो लोकालोकाचलतटगताग्नेयदृषदां
स्फुरत्तेजोधाटी झटिति नयनान्यन्धयति नः ॥ १३ ॥

प्रथमः—हन्त! भोः सखे पश्य परितो नन्दनस्य शोचनीयां दशाम् । भग्नाः पारिजातादयः । विशीर्णा लतागृहाः, क्रीडासन्निवेशाः सरस्सोपानपङ्क्तयश्च ॥

तृतीयः—अहो! इदमत्यन्तमसह्यं द्रष्टुं अचिरोपनतपातं सर्वशोभासंपन्नं वस्तु ।

तृतीयः—मित्रे! पश्यतम्—

निरस्तं तद्ध्वान्तं किमपि किमपि स्मेरवदनाः
प्रसादं काष्ठान्ताः दधति नयनं शक्तिमयितम् ।
क्रमादुन्मीलन्ति प्रकटरुचि ते ते च विषयाः
वराहोत्क्षिप्ताया जलधिजठरान्तादिव भुवः ॥ १४ ॥

प्रथमः—कुत इयमूर्ध्वज्वलना शिखावलिः भूतलादतिजवेन उदेति ।

तृतीयः—सखे निपुणं निरूप्यताम् । रथमिव दिवमारोहन्तं पश्यामि । परं च—

अशनिध्वज उच्चकैर्यतो हरिता यच्च तुरङ्गमा अमी ।
ध्रुवमद्य कुतोऽपि भूतलाद् उपकारेण सहैति मातलिः ॥ १५ ॥

प्रथमः—आम् , सत्यम , एवमेव । अपि च जानामि पूर्वमेव सम्यक्; अयं सुधीः अत्युपकारी च काले मातलिर्नाम ॥

[प्रविशति नारदः ।]

नारदः—(तानवलोक्य) अमरतपस्विनः, पश्यत, उपसर्पति युष्माकमुज्जीवकः, आनन्दस्य कन्दलयिता, द्विषन्मर्दनः, उत्सवप्रदाता प्रमोद-नाडिन्धमः, क्षितितलालङ्कारः, भुवो भर्ता, लक्ष्म्या वासः, वाण्याः स्वयंवरवरः, प्रतापस्य एकं शरणं, तेजसां निपुञ्जः, वीर्यस्य मूर्तिः, नाम्ना रुद्रः, अपर इव महेश्वरः आयाति । अद्य च—

दिशः प्रसीदन्ति सुखं च वायुः
आवाति सर्वत्र सुगन्ध एषः ।
प्रतापरुद्रश्च समैति; शत्रुः
क्षतः, पुनर्वः परिनिष्ठिता श्रीः ॥ १६ ॥

(उपर्यागत्य रथः तत्पार्श्वे तिष्ठति, रथादवरुह्य)

मातलिः—स्वामिन्! वीररुद्र! अयं देवर्षिर्नारदः ।

वीररुद्रः—महर्षे! प्रणमत्ययं विधेयो वीररुद्रः ।

ना०—(स्वगतम्) अहो! विनयोत्कर्षः । अहो! शरीरसौन्दर्यम्, आकृतिगाम्भीर्यं, मुखतेजश्च ॥

चित्रमेतादृशी सृष्टिः तातेन कलिता कलौ ।
प्रदातुमिव सर्वेषां गुणानामभयं परम् ॥ १७ ॥

(प्रकाशम्) स्वस्ति तेऽस्तु परन्तप!

वीर०—स्वामिन्! अनुगृहीतोऽस्मि । जानामि मातलितः, नायं विलम्बस्य काल इति । तद्भवतामाशिषा, कृपया च भगवतो भूतनाथस्य, सद्य एव गत्वा सकलमपि असुरबलम् ....(इत्यर्धोक्ते लज्जते ।)

ना०—(स्वगतम्) अहो! अत्युदात्तता वत्सस्य गुणानाम्! अहो! अविकत्थनता! वत्स! गच्छ, विजयी भव ॥

वीर०—क्व वा स्थितं सुरारिबलम्?

सुराश्रयः—प्रभो! संप्रति आक्रान्तनिलिम्पनगरा:, सुखं विहरन्ति ते दैवसंपदा संपोषिताः, सुधर्मायाम् ।

वीर०—भवतु, एहि मातले । (इति निष्क्रान्तो वीररुद्रः समातलिः ।)

सुराश्रयः—अहो अस्य महानुभावता!

नृपः प्रतापरुद्रोऽयं लोकातीतगुणाम्बुधिः ।
सहस्रांशुर्महोधामा स्फुलिङ्गोऽस्य द्युतेरिव ॥ १८ ॥

(पुरतो दृशा वीररुद्रमनुसृत्य, निरूप्य) अहो! तेजो वर्धते ॥

एकः—पश्य सखे राक्षसान्!

त्वक्पत्रकौशिकचमूभिरमी सहैव
भीतिप्रतोदबहुलीकृतवेगयाताः ।
सर्वत्र मूर्च्छति महीपतितेजसीत्थं
सीदन्त्यटाभिरभितः शरणं न लब्ध्वा ॥ १९ ॥

ना०—आः किमेतत्, उपसृतमात्रे देवास्थाने वीररुद्रात् स्फुरन्ति लोकघस्मराणि तेजांसि । उदितमिव प्रभानिधेरर्बुदैः । उद्गत इव समस्तोऽप्यौर्वः

पावकः । (पुनश्च पुरोऽवलोक्य) आः! आकारिता आगता बहिर्दानवाः । कथम्, आगतमात्रा एव उदग्रप्रतापज्वालाभिरभिमृष्टाः भस्मावशेषा भवन्ति ॥

सर्वे—(विलोक्य) अये! कोऽयं धूमोत्करः!

ना०—आश्चर्यम् आश्चर्यम् । सत्यं रुद्र एवायम् । अथवा रुद्रादप्यधिकप्रभाव एवायम् । यतः—

निटिलाक्ष्णा सुमधनुषं ददाह रुद्रः पुराणि हसितेन ।
अस्मिन्पुनरुपगच्छत्यपि भस्मीभवति दानवव्रातः ॥ २० ॥

(देवान् आलोक्य) आगच्छत, गच्छामो वयं सुधर्माम् । वीररुद्रतेजसि शलभायितम् अरातिभिः । पौलोमीमहेन्द्रमोक्षाय व्रजामः ॥

सर्वे—बाढम् ॥

(निष्क्रान्ताः सर्वे ।)

॥ इति असुरविजयो नाम तृतीयोऽङ्कः ॥

॥ अथ चतुर्थोऽङ्कः ॥

(ततः प्रविशति बृहस्पतिः सह मातलिना)

बृहस्पतिः—मातले! अथ कोऽयं महापुरुषो वीररुद्रो नाम, येन वयमुज्जीविता अद्य ॥

मातलिः—आवेदितोऽस्मि नारदमहर्षिणा । अयमन्ध्रेष्वेकशिला नाम नगरी, तत्रत्यो राजेति । परमेश्वरस्य भक्तः प्रसादपात्रं च, कुमारस्य अवतारः इति च वर्णितं तेनैव ॥

बृह०—भवितव्यम् । एवमेव मम तदैव अस्फुरत् । अन्यथा कुतो वा परमेश्वरात्, तदंशात् कुमाराच्च ऋते ज्योतिरेतादृशम् ॥

मा०—प्रियं नः, प्रियं नः। दिष्ट्या तदुपकृताः पुनरपि संपन्नास्स्मः। किन्तु अयमेको महान् अद्यापि शोकहेतुः॥

बृह०—क इव। अपि कृत्स्नाः सुरबन्दिनो मोचिताः?

मा०—मोचितं देवलोकमात्रम्।

बृह०—तत्कोऽपरो हेतुरावेगस्य।

मा०—असुरबलान्मोचितोऽपि प्रावृण्मेघत इव सुधामयूखः, प्रतिष्ठापितोऽपि पुनश्च सिंहासने, प्रापितोऽपि प्रियाम् इन्द्राणीं, नयनेषु अद्याप्यनुपरतात् व्याधेः परं पीड्यते देवेन्द्रः। परं च वीररुद्रतेजोऽवलोकनेन कानिचिन्नयनानि अन्धतां गतानि॥

बृह०—आम्, मातले, महदिदं शोकस्थानम्। कुण्ठितशक्ती अश्विनौ। अपर्याप्तशीतलतया अशक्यप्रभुसेवः सुधांशुरपि व्यर्थं मन्यते स्ववपुः। कुतो वाऽऽसादितव्या अतिचान्द्री सुधा, यया सहस्राक्षस्य उपद्रवोपशमो भवेत्॥

(इति चिन्तयति, सर्वतः पल्लवति अपूर्वा चन्द्रिका।)

मा०—गुरो, किमेतत्! अकाण्डेऽद्य चन्द्रिका॥

बृह०—अस्मन्मनोरथेनैव भवितव्यम्॥

[ससंभ्रमं प्रविशति सिद्धः कश्चन]

मा०—सिद्धपुरुष, कुतस्संभ्रमः? इत एहि॥

सिद्धः—आः मातलिस्त्वमत्र, एहि शीघ्रम्। त्वरस्व त्वरस्व। वृक्षं वा प्रासादाग्रं वा आरोहावः। (परितो प्रचालयन्नयनम्) कथं विशीर्णं नन्दनं न प्रयच्छति मे शरणम्॥

बृह०—अये! किमेतत्। किंकृतोऽयमावेगस्त्वयि?

सिद्धः—स्वामिन्, नायं विस्रब्धालापस्यावसरः। रक्षतु भवानात्मानम्॥

मा०—अलमलमावेगेन । तिष्ठ (इति बलादुपगृह्य) वदतु भवान्, किं वृत्तम्?

सिद्धः—(सत्वरम्)

प्रालेयाद्रेः चन्द्रकान्तोपलेभ्यः गङ्गाकोटिस्सर्वतोऽप्युत्थिताऽद्य ।
तत्र प्रान्तस्सर्व एव क्षणेन क्षीराम्भोधौ मज्जितो वा विभाति ॥ २१ ॥

मा०, बृ०—किं किम्?

सिद्धः—सकलोऽपि पर्वतेश्वरः प्लवति । ततो भीतो विद्रुतोऽहम् । प्लाव्यते चित्ररथवनान्तश्च । अचिरेण ब्रह्माण्डमेव उद्वेल्लत्यस्मिन् प्रलयपयोधौ मज्जेत् । तद्रक्षतमात्मानौ । (इति वदत्येव परितोऽप्येकान्तं धवलं भवति रोदः, अतिमात्रं विद्योतते विशदिमा ॥)

मा०—आचार्य! आचार्य! उपेक्षितं नाम आवाभ्यामेतावत्कालम् सत्यमेव प्रलयपयोधेराक्रमः प्रवर्तते ॥

(विद्रुता अन्ये बहवः पर्याकुला आगच्छन्ति ।)

एकः—स्वामिन् प्रालेयशैलः प्रचलति

द्वितीयः— भगवन्नेष दुग्धाम्बुधामा
व्याप्तुं लोकान्समस्तान् बहुलितसलिलः प्लावयत्येवमद्य ।

बृह०—कैलासो नैव नो वा शिव इह न च वोल्लोलकोलाहलोऽतः?

मा०—हन्तासौ दाक्षिणात्यः क्व नु स मुनिवृषो वार्धिपो मृग्यतां भोः ॥ २२ ॥

(प्रविशति तत्पथेन गच्छन् परमेश्वरः सपत्नीकः, नारदश्च ।)

(नारदः बृहस्पतिसमीपमुपेत्य)

नारदः—भोः सुपर्वाचार्य! अयमत्र देवो वृषभध्वजो याति ।

बृहस्पतिः—स्वामिन्! वृषभध्वज इति अधिक एव श्वेतभ्रमः ।

ना०—अयमत्र भगवान् नीललोहितः शितिकण्ठः, समं सिन्दूरा-रुणया च पराशक्त्या ॥

बृ०, मा०—आः पश्यामि :

पुरातनस्य द्वन्द्वस्य पुरतो नतयो मम ।
सृष्टिस्थित्युपसंहारलीलाविभ्रमदर्शिनः ॥ २३ ॥

ना०—तदेहि, सुधर्मां याति वो मङ्गलाय सर्वमङ्गलापतिः । वयमपि साधयामः ॥

सर्वे—बाढम् ॥

(निष्क्रान्ताः सर्वे ।)

[इति विष्कम्भकः]

(सुधर्मा । प्रविशति महेन्द्रः वीररुद्रांसविन्यस्तहस्तः सपरिवारः ।)

देवेन्द्रः—संप्रति जाग्रति परितोऽप्यदृष्टचरपीयूषप्रसरे अपनीतनयन-व्यथः स्वास्थ्यं प्रापितोऽस्मि । कुतः पांसवः, कुतः तमः, कुतो ज्योतिः, कुतो वेयं अपूर्वा कौमुदी इति विचारे परं कृपणा वयम् ॥

वीररुद्रः—(श्रुत्वा) महेन्द्र! किमिति किमिति?

दे०—सखे! कतिचन दिनानि देवलोकः आश्चर्यपरम्परया विपर्यासित आसीत् । अयं प्रसृतो विशदिमा च तस्यामेकः । न जाने कियदायामवती सेति । तद्भवतु, एहि महीनाथ, लज्जितास्स्मो वयमद्य त्वदीयविक्रमेण । किमुच्यते, त्वां धारयामो जीवितानि ॥

वीर०—विरम, विरम, सखे । अलमतिमात्रं मित्रं स्तुत्वा । अथवा, आत्मश्लाघायां किमिति ते रुचिः?

दे०—सत्यमाह भवान् । अनपर एव त्वमस्मत्तः । किं बहुना न सहे विकत्थनाम् ॥

(प्रविशति विधिहरिदेवर्षिसंत्रसमावृतः परमेश्वरः । उभौ प्रणमतः ॥)

परमेश्वरः---(सुधर्मामनुगृह्य अभयहस्तेन) भो भो देवाः, महर्षयश्च ! आसनं तत्तदलंकुर्वन्तु भवन्तः । महेन्द्र, अलंक्रियतां सिंहासनं वीररुद्रेण साकम् ॥

[सर्वे तथा कुर्वन्ति ।]

परमेश्वरः---

यन्नासीरजधूलिपुञ्ज इति वः प्रादादतीव व्यथां
यद्ध्वस्तारिमहीपतिव्यसनजं तादृक् तमश्चाभवत् ।
यत्तेजोऽसुरघस्मरं यदुदयत्कीर्त्याद्य सर्वं जगत्
दुग्धाब्धीयति सोऽयमेकदृषदो नाथो मदाख्याधरः ॥ २४ ॥

(तदा काचिदशरीरिणी वाणी वैतालिकत्वमाचरति ।)

दुकूलन्त्याशा आभरणति च तारावलिरियं
नभोगङ्गा माला व्यजनममृतांशुर्वियदपि ।
वितानं चास्थानं त्रिभुवनमहो दिग्वसनवत्
यशोराजान्ध्रेशो, मिलितमथवा कोटियुगलम् ॥ २५ ॥

(सर्वे विस्मयानन्दोत्फुल्ललोचनवक्त्राः । इन्द्रः किंचित् लज्जया श्वेतते; धीररुद्रः लज्जावनतमुखारविन्दो भवति ॥)

वीररुद्रप्रापितलक्ष्मीक ! महेन्द्र !

स्वस्था भवन्त्वसुरभीतिविनाशतोऽमी
देवाः, निलिम्पमुनयो हतकर्मविघ्नाः ।
अद्य त्वदीयपदमेष च वीररुद्रः
भुङ्क्ते त्वया सह, न यज्ञशतश्रमेण ॥ २६ ॥

(प्रसरति अरुणिमा सर्वतः । सर्वे संभ्रमन्ति ॥)

केचित्---अहो ! अपशकुनभूता रुधिरधाराः प्रवहन्ति ।

मुनयः——(उत्थाय) नहि नहि, सर्वमङ्गला, अहो, सन्ध्यादेवी!

(इति साञ्जलिबन्धं गायत्रीम् उच्चारयन्ति ॥)

परमेश्वरः——(प्रहस्य) भो देवाः, मुनयश्च, अलमन्यथाविकल्पैः। न किंचिदेतत्। गण्डूषपादाघातादिभिः पुनरपि नन्दनं उज्जीवयितुमादिष्टाः, नन्दनवनगताः अप्सरोविलासिन्यः अस्मद्भक्तस्य वीररुद्रस्य पराक्रमयशोवशीकृतस्वान्ताः तं प्रति प्रकटयन्त्यनुरागम्। तदेष रक्तिमा। तदासतां भवन्तो विस्रब्धम्। अद्य वीररुद्रस्य परमेश्वरप्रतिष्ठाभिषेकं करिष्यामि। पठ्यन्तां प्रशस्तयः॥

(इति स्वशिरोवासपूतत्रिमार्गगाजलानि वीररुद्रस्योपरि आवर्जयति, स्वनन्ति भव्यवाद्यानि, पतन्ति पुष्पवृष्टयः, नृत्यन्ति अनुभावपेशलममराङ्गनाः। सर्वे हर्षोत्कर्षपुलकिता वर्तन्ते॥)

परमेश्वरः——पठ्यन्तां प्रशस्तयः।

(बृहस्पतिः प्रशस्तिवाचनाय संरभते; हिक्कति, शोधयति कण्ठं, भ्रान्ताक्षि स्तब्धीभवति, न तु वक्तुं शक्नोति।)

परमेश्वरः——अहो! तपस्वी सुरगुरुरेडमूकतां गतः। ब्रह्मन्नाप्तवाक्यप्रणेतः, भारतीरमण! किमिदं जोषं भूयते॥

ब्रह्मा——न न, नहि किंचित्। करोम्येव सन्दर्भम्। किन्तु महान् कालोऽद्य यतो गृहिणीविधुरोऽहं कुटुम्बकलहापदेशात् ब्रह्मचर्यमातिष्ठे॥

परमेश्वरः——सत्यमाह भवान्। मयैव विस्मृतं, यदद्य विसृष्टभक्तोक्ता विहरति विजृम्भितविलासविलोला कुत्रचिदन्यत्रैव भगवती भारती॥

विष्णुः——अतिलघु सम्बरम्भद्य, यदद्य वत्सो वहति मूलकन्दुकं, नास्ति च मे मुहुरवतारकार्यभारः। अपि च मामुज्झित्वा कुत्रापि गतां लक्ष्मीमन्वाय विषाद आसीत्। अद्य नवाश्रयं वीररुद्रं विलोक्य पूर्वापरं निश्चिकायस्मीति यत्सत्यं लज्जापितोऽस्मि॥

मुनयः—भो वीररुद्र! परमेश्वरप्रसादप्रथमपात्रस्य भवतः किमस्त्याशास्यम् । तदेवमस्तु, वत्स! चिराय स्थिरभक्तिर्भव भूतपतौ ॥

दिक्पालाः—स्वतस्सिद्धलोकाधिकधाम्नस्ते किमस्मत्तो दिक्पालकवराकेभ्यो वरणीयम् । तदस्तु, त्वत्सामन्ता इव सम्यक् उन्निद्राः पालयामो दिङ्मुखानि ॥

परमेश्वरः—भवतु, कालोचितं तमेवामन्त्रयामि ।

(भगवन्निध्यानमुहूर्त एवाविर्भवन् प्रासाग्रे प्रस्फुरत्प्रोथ इवाश्वः संरभते कवीश्वरो विद्यानाथः ।)

अये, प्राप्त एव स्ववैखरीखर्वीकृतगर्वसुपर्वगुरुः, निजसारस्वतविलासश्वेतमानचतुराननः, विवर्तो वाचो वैभवानां, मूर्तः लोकातिगच्छदुत्प्रेक्षापरम्परः, कविरन्वर्थाख्याप्रख्यो विद्यानाथः । भो देवाः, वन्दन्तां भवन्त एनम् । यस्य भगवति वीररुद्रे, वीररुद्रस्यैव यावती मदङ्घ्रियुगे, तावत्या अपि भूयसी भक्तिः । न किञ्चिदपि अन्ध्रेश्वरं स्तोतुं प्रवृत्तम् श्राम्यति तद्वदनम् । अनवधानावसरेऽपि नास्यास्यान्निष्पतति पद्यमेकमपि यन्न वीररुद्रपरमेश्वरभव्यदिव्यनामाङ्कितम् । किं बहुना, यत्सत्यं जपत्येवायं तारकमन्त्रं प्रतापरुद्रं नाम पञ्चाक्षरीमयम् ॥

(इति वादिन्येव परमेश्वरे एतावदधोमुखो वीररुद्रः गृहीतसर्वाशीः पादयोः परमेश्वरस्य प्रणम्य उत्थाय)

विद्यानाथः—(कण्ठहेषापूर्वकं झञ्झामारुत इव मूर्च्छन् पठति)—

ससेवाहेवाकप्रतिभटमहीपालनिकर-
स्फुरत्कोटीराढ्यप्रसृमरमहोरत्नविवहैः ।
ज्वलद्भानुव्यूहैः स्नपितमरिराजन्यक्रमनो-
नभोभूजत्पादूद्वयमुदयहेतोर्भवतु नः[1] ॥ २७ ॥

1. विद्यानाथविडम्बनार्थाः अन्येऽपि श्लोकाः नाटककर्त्रा कृताः, येष्वन्यतमोऽयं श्लोकः ।

परमेश्वरः—अहो ! अयं कविरास्थानिको महाधाटिस्साहसी विद्यानाथः ।

एतावदन्ध्रनृपतेः पटहं प्रताड्य
प्रध्माय शङ्खमपि नैव वितृप्यदास्यः ।
आबद्ध्य कच्छमवशोध्य गलं प्रताप-
पादूसहस्ररचनाय विजृम्भतेऽद्य ॥ २८ ॥

वत्स ! अलमतिश्रमेण । (देवादीनालोक्य) सर्वे एव वयं मिलित्वा सद्य एव भूमण्डलं गत्वा वत्सस्य साम्राज्याभिषेचनमेकशिलायां निर्वर्त्तितं प्रेक्ष्य आत्मन आनन्दयामः । तदायान्तु सर्वे भवन्तः ॥

(सर्वे तथेति उत्तिष्ठन्ति)

वत्स ! किं ते भूयः प्रियमुपहरामि । तथापि इदमस्तु भरतवाक्यम्—

त्वत्तुल्येश्वरलाभमोदितमही संपद्भिरेवं सदा
देवानामुपकारलेशमपि वा नापेक्षमाणास्त्वसौ ।
त्वं च प्रीणय नित्यमाश्रितमहीदेवान् सुरानोकह-
श्रीलुण्टाकयशश्श्रणैः प्रमथितारातिः स्वविश्राणनैः ॥ २९ ॥

[निष्क्रान्ताः सर्वे]

॥ इति परमेश्वरपट्टाभिषेकाख्यः चतुर्थोऽङ्कः ॥

(निर्मातुर्भरतवाक्यम्)

त्यक्त्वा नैच्यं धरणिविबुधः स्वात्मविद्याविचारैः
प्राच्यां ख्यातिं भजतु पुनरप्यात्मनामानुरूपाम् ।
वाणी सूरेर्न भवतु कदाप्याश्रवा काञ्चनानां
योगो भूयात् भुवि सरसयोरेव भव्योदयश्रीः ॥ ३० ॥

॥ समाप्तमिदं रूपकं विद्यानाथविडम्बनापरनामा प्रतापरुद्रविजयः ॥